अष्टादशोपचारांस्तु मंत्री एतान् समाचरेत्। तथा षट्त्रिंशदुपचारैः तदुक्तं सुंदरीरहस्यपद्धतौ। आसनाभ्यंजने
तद्वदुद्वर्तननिरीक्षणे। समार्जनं सर्पिरादेः स्नापनावाहने तथा। पाद्यार्घ्याचमनीयं च स्नानीयं मधुपर्कको।
पुनराचमनीयं च वस्त्रं यज्ञोपवीतकं। अलंकारा गंधपुष्पे धूपदीपौ तथैव च। तांबूलानि च नैवेद्यं पुष्पमा॰
लां तथैव च। अनुलेपनं च शय्या च चामरं व्यंजनं तथा। आदर्शदर्शनं चैव नमस्कारोऽथ नर्तनम्। गीतवादी
त्रदानानि स्तुतिर्होमप्रदक्षिणम्। दंतकाष्ठप्रदानं च ततो देवविसर्जनम्। उपचारा इमे ज्ञेयाः षट्त्रिंशत्स्व
रूपतः। अथ चतुःषष्ट्युपचारैः तदुक्तं संग्रहे। आसनारोपणं सुगंधितैलाभ्यंगो मज्जनशालाप्रवेशनम्।
मज्जनमंडपमणिपीठोपवेशनं दिव्यस्नानीयं उद्वर्तनं उष्णोदकस्नानं कनककलशच्युतसकलतीर्था
भिषेकं धौतवस्त्रपरिमार्जनं अरुणदुकूलपरिधानं अरुणदुकूलोत्तरीयं आलेपमंडपप्रवेशनम्। चंदना
गरुकुंकुममृगमदकर्पूरगोरोचनादिदिव्यगंधसर्वांगानुलेपनं केशभारस्य कालागरुधूपं मल्लिकामालतीजा
तीचंपकाशोकशतपत्रपूगकुड्मलपुन्नागकल्हारमुख्यसर्वर्तुकुसुममालाः भूषणमंडपप्रवेशनम्। भूषणमणिपीठोप
वेशनं नवमणिमुकुटं चंद्रशकलं सीमंतसिंदूरं तिलकरत्नं कालांजनं पालीयुगलं नासाभरणं अध
रयावकं ग्रथनभूषणं कनकचिंतामणिकं महापदकं मुक्तावलिं एकावलिं देवच्छंदकं केयूर सम॰ २१

युगलचतुष्टयं वलयावलिं ऊर्मिकावलिं कांचीदामकटिसूत्रं शोभाख्याभरणं पादकटकं रत्ननूपुरं पादां
गुलीयकं एककरे पाशं अन्यकरे अंकुशं इतरकरे इक्षुचापं अपरकरे ज्ञोत्पलांकुशमुद्रांकं दक्षशंकरौ इषु
पुष्पबाणान् श्रीमाणिक्यपादुके स्वसमानवेषाभिरावरणदेवताभिः सह महासिंहासनाधिरोहणम्। कामेश्व
पर्यंकोपवेशनम्। अमृतासनसेकं आचमनं कर्पूरवटिका आनंदोल्लासविलासहासं मंगलारात्रिकं श्वेतछत्रं
चामरयुगलम्। दर्पणं तालवृंतं गंधपुष्पधूपदीपनैवेद्यं च कल्पयेत्। तदुक्तं मानसोल्लासे। संत्युपचारा देवे मंत्री उप
चारात्मदेवता संतुष्ट्यासे बोधनपदेन सर्वोपचारमंत्रा ललितापरं कामस्वामिनि नम इत्यंतः कार्याः। तथा च
श्रीं ह्रीं क्लीं श्रीमहात्रिपुरसुंदरि पाद्यं कल्पयामि नमः इत्यादि सर्वत्र बोध्यम् इति पाद्यम्। श्रीविद्याविधायेयमभि
लाषः अन्यकर्तृके च यः। तथा चोक्तं ज्ञानमालायां। उपचारविधिं वक्ष्ये दक्षावाहनमासनम्। स्वागतं कुशलप्र
श्नमिति तेदशनो गुरुः। पाद्यं पादांबुजे दद्यात् देवस्य हृदयात्मना। हृदयाख्येन नमः इत्यर्थः। एतत् श्यामाक दूर्वाब्ज
विष्णुक्रांताभिरीरितम्। स्वधामंत्रेण वदने दद्यादाचमनीयकम्। जातीलवंगकक्कोलैस्तदुक्तं तंत्रवेदिभिः। स्वधामं
त्रमिति मंत्रः। अर्घं दिशेत्ततो मूर्ध्नि शिरोमंत्रेण देशिकः। गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपैः। सदूर्वैः सर्वदेवानां
मेतदर्घ्यमुदीरितम्। शिरोमंत्रः स्वाहा मंत्र इत्यर्थः। स्वधामना ततः कुर्यान्मधुपर्कं तु लांछते। आज्यं दधि समायुक्तमि
मेतदुक्तं मनीषिभिः। आत्ममंत्रः स्वधामंत्रः वषिति मंत्र इत्यर्थः। तेनैव मंत्रेण कुर्यादद्धिराचमनीयकम्। तेनैव तु मि
तिमंत्रेणैव अर्घं दत्त्वा पाद्यं दद्यात्। तदुक्तं क्रमदीपिकायाम्। दत्त्वासनं स्वागतमितिकृत्वा दीयेत् पाद्यार्घपाद्यमाचमनीय॰

श्री
श्या
का
२२

कानिदेयानित्यादिश्रवणात् इत्याचिकल्पइतिभावः आचमनीयंचारत्रयेमूलेनदद्यात् तदुक्तंवर्णायागे
तथेत्याचमनीयंदद्यात्रिवारंमूलमंत्रकल्पे मधुपर्कंचपरिपुष्पंचचोपरिस्पर्शयेत्सुधीः चोपरिइतिपुष्पादानमितिष्ठ
ते: वौषडन्तमइतिमंत्रः अर्घादिदानेऽर्पितया तदुक्तंसारसंग्रहे नमःस्वधाचस्वाहाचवौषडितियथाक्रमम्
छन्दुरःसरमर्घार्घपाद्यादीनिप्रकल्पयेत् गंधाद्भिःकारयेत्स्नानंवाससीपरिधापयेत् दद्याद्यज्ञोपवीतंचरत्ना
द्याभरणैःसह न्यासक्रमेणमन्त्रेणापुरितैर्मातृकाक्षरैः अभ्यर्च्यदेवंगंधाद्यैरंगादीन्विन्यसेत्ततः गंधचंदनक
र्पूरकालागरुभिरीरितः कमलकरवीरेश्चकल्हारंचोत्पलैः कुंदपुन्नागमंदारयादलानागचंपकम्
आरक्तिंकर्णिकारंपाटलीवनमालिका सौगंधिकंसकोरंटपालाशाशोकमल्लिकाः दमनंसर्जकंबिल्व
मल्लेनंमुनिपुष्पकं अन्यानिवस्तगंधीनिपुष्पमात्राणिदेशिकैः उपदिष्टानिदत्तायमाददेनविवर्णाः
मलिनेऽमिलंदृष्टंक्रिमिकेशादिनाश्रितम् अंगास्पृष्टंसमाघ्रातंस्पृष्टंपर्युषितंचयत् अंगास्पृष्टंदृष्टादि
रिक्रमित्यर्थः स्वकुलैःपतितैश्चैवपंक्तिभेदविर्वर्जितैरपि अन्यैरपिपुष्पैश्चदलैःपत्रैस्तुनार्चयेत् येनकेनापि
पुष्पेणपत्रेणापिदलेनवा स्वतःकुलैःविदारितीयत्नतोद्भवेनवा भावार्थीज्ञीविनार्थीचनार्चयेद्धरिनस्य
ले परागेविभ्रमदोष्यः पुष्पाण्यानीयचार्चयेत् अविज्ञायैवतैर्यत्तनिष्फलंतस्यदर्शितम् तथाचज्ञा
नमालायां पुष्पंचायदिवापत्रंफलंनैवमधोमुखम् पुष्पंजलिविधिर्हिवापद्योत्पन्नंतथार्पणम् तथाच
कालिकापुराणे नैवेद्यंदक्षिणेवामेपुरतोवानपृष्ठतः दीपंदक्षिणतोदद्यात्पुरतोवानवामतः वामतस्तुत

राम
२१
22

धूपमग्रेवानतुदक्षिणे निवेदयेस्तुरोभागेगंधपुष्पंचभूषणम् वामेधूपंदद्यादितिविलक्षविषयम् शाक्तिवि
षयेतदक्षिणेदद्यात् शतिमादिपुष्पयोगंयागेदत्तेवयत्नतो दद्यादथोग्रपुरतोनैवेद्यंभोजनादिकम् आधारो
परिदीपंचदद्यायत्नेनमानवः सर्वेसरूपस्तमीसदृतेनतिदंद्वयम् अकार्यपाद्यातेवदीपनापंतथैवच इ
ति कालिकापुराणे अगरुशीरगुल्गुलुपार्कगामथवंदनैः धूपयेदाज्यसंमिश्रैर्ज्ञीचैर्देवस्यदैशिकः उपी
रंवीरणमूलम् वर्माकर्षरगार्भिणासर्पिषातिलतैलेनवा आरोप्यदर्शयेत्दीपान्सुधैःसौरभशालिनः स्वार
दूपदेशाविमलेपायसंसदशार्करम् कदलीदलसंयुक्तंमाद्यमंडीनिवेदयेत् उपदेशाःचर्वणीयद्रव्यम् मो
दकःनारिकेलादिः ततस्ततत्त्वसंदद्यात्पुपचारांतरांतरे अंगानिलोकपालांश्चपत्रेदावारणानिच केसरे
पुष्पिकोणादिहृदयादीनिविन्यसेत् नेत्रमग्रेदिशास्वस्त्रंध्यानवर्जंअंगदेवताः हृदयंवह्निकोणेचनैऋते
शिरईरितम् वायुकोणेशिखाप्रोक्ताकवचंशिवदिक्त्वपि पुरतोनेत्रमभ्यर्च्यशाराधायायणस्यास्त्रके शाक्ति
विषयेप्रकारमाह उक्तंश्रीवनदुर्गाकल्पे दद्यादस्तनर्तनीभ्यांपुष्पत्रिदिव्यंचरेत् नार्चयेदेकहस्तेनयदिके
ऽतिहिमात्मनः केवलंदक्षहस्तेनअतिवारायकल्पते वामेनकेवलंभोगःसंयोगाद्भोगमोक्षदम् अंगुष्ठा
नामिकायोगःशिवयाशास्त्रकेपरम् अंगुष्ठःशिवइत्युक्तोनामिकाशक्तिरुच्यते तयोःसंयोगमात्रेणाद्भवे
स्यादस्तोपसम् शिवशास्त्रात्मकेविदुःद्वयंस्यादेवलीद्वयम् तेनतत्रिसमंतद्वयेपरमात्मनमिष्यते कृतादि
दोषमिश्रार्थमंत्राणांसाधकोत्तमः गुरूपदेशविधिनायोनिमुद्रांसमभ्यसेत् यथा आधारेचगुरुत्र्यामे

Dr. BHAU DAJI MEMORIAL
Dr. BHAU DAJI MEMORIAL

श्री॰ ग्रा॰ कं॰ २३

पंकजं स्यात्पत्रदलम् तत्र स्वायंभुवं लिंगं रक्तमोरं विचिंतयेत् तत्र स्वार्धत्रिवलयां प्रसुप्तभुजगाकारां कुंडलि
नीं विचिंत्य तां हुंकारेण मनोदंडहतां कृत्वा उत्थाप्य मूलाधाराग्निं तां मूलस्य स्वाधिष्ठानचक्रमानीय स्वाधि
ष्ठानाग्राभिस्थं मणिपूरकं चक्रमानीय मणिपूरकाद्धृदयस्थमनाहतं चक्रमानीयानाहतात्कंठस्थं कंठा
द्विशुद्धं चक्रमानीय विशुद्धात् भ्रुवोरंतरालमाज्ञाचक्रमानीयाज्ञातः सहस्रदलकमलं नीत्वा सहस्रदलक
मलावस्थितसदाशिवस्योत्संगे सामरस्यं विचिंत्य तां मूलस्वरूपां कुंडलिनीं सदाशिवपदाज्ञाचक्रमा
नीय तस्माद्विशुद्धादनाहतमणिपूरकस्वाधिष्ठानक्रमेण मूलाधारं नयेत् तत्र तां मंत्रदेवतां हृदि विचिंत्या
मानसोपचारैराराधनमस्याः कुर्यात् इति योगिनीमुद्रा अभ्यासकरणाच्छास्त्रः संस्कारानाचरेत्सुधीः मंत्र
स्य दशाकस्य तेन संस्कारा सिद्धिदायिनः जननं जीवनं पश्चात्ताडनं बोधनं तथा अथाभिषेको विमलीक
रणाप्यायने ततः तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रियाः मंत्राणां मातृकामध्यादुद्धारो जननं स्मृतम्
मातृकेति मातृकापंचाशद्वर्णमध्यात्मातृकामध्यात् देवमंत्रोद्धारः इति मंत्रजननं प्रणवांतरितान् कृत्वा मं
त्रवर्णान्जपेत्सुधीः एतज्जीवनमित्याहुः मंत्रतंत्रविशारदः प्रणवांतरितेति देयमंत्रस्यैकैकवर्णानंतरं प्रणवं द
त्वा जपेदित्यर्थः एतन्मंत्रस्य जीवनं मंत्रवर्णान्समालिख्य ताडयेच्चंदनांभसा प्रत्येकं वायुना मंत्री ताडनं त
दुदाहृतम् प्रत्येकं देयमंत्रस्यैकैकाक्षरं वायुना वायुबीजेन यं इत्यनेन परिचंदनाभिश्रितजलं दद्यात्
इति मंत्रस्य ताडनं गोपालपक्षे शुक्लचंदनजलेन देवीविषये रक्तचंदनजलेन इत्यर्थः विलिख्य मंत्रं त राम॰ २३

त्पंचार्णसंस्थितैः करवीरैः तत्संख्याक्षरसंख्यातैर्हन्यादणुं तेन बोधनम् विलिख्येति तत्र पटादावित्यर्थः यांते
नेति यकारस्यांते रेफः तथा वरमिति वह्निबीजमित्यर्थः इत्यं मंत्रस्य बोधनम् स्वतंत्रोक्तविधानेन मंत्री मंत्र
स्य सेव्यया अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशुद्धये स्वतंत्रोक्तेति विष्णुपक्षे शुक्लचंदनेन देवीपक्षे रक्तचंदने
नेत्यर्थः संचिंत्य मनसा मंत्रं ज्योतिर्मंत्रेण निर्दहेत् मंत्रे मंत्रत्रयं मंत्रविमलीकरणमिदम् ज्योतिर्मंत्रो यथा
तारं व्योमाग्निमनुयुक्दंडी ज्योतिर्मनुर्मतः तारं ॐकारः व्योम हकारः अग्नि रेफः मनुः औकारः दंडी अ
नुस्वारः तेन ॐ ह्रौं इति ज्योतिर्मंत्रेण मलत्रयं मायीय कार्मण शारीरं संज्ञकमिति कुशोदकेन तु [illegible] प्र
त्येकं प्रोक्षणं मतः तेन मंत्रे विविदिवदेन दाप्यायनं मतम् तेन मंत्रेण देयमंत्रेण एतन्मंत्रस्याप्यायनं मंत्रेणा
वारिणा मंत्रतर्पणं मतम् मंत्रेण मूलमंत्रेण तथा च देयमंत्रमुच्चार्यामुकमंत्रं तर्पयामि इति प्रयोगः एत
न्मंत्रस्य तर्पणम् तारमायारमायोगो मनोर्दीपनमुच्यते तारं ॐ माया ह्रीं रमा श्रीं योगः संबंधः तेन देव
मंत्रस्यादौ ॐ ह्रीं श्रीं इति बीजत्रयं दत्त्वा जपेदित्यर्थः एतन्मंत्रस्य दीपनम् जप्यमानस्य मंत्रस्य गोपनं त्वप्र
काशनं संस्कारा दश मंत्राः सर्वतंत्रेषु गोपिताः यान्कृत्वा संप्रदायेन मंत्री वांछितमाप्नुयात् [illegible]
लात्मप्राणौ …: कुर्यात् शिष्यस्य सत्क्रियाम् ततः सुधौतदंतांघ्रिं स्नातं शिष्यं समाहितम् पाययित्वा पं
चगव्यं … तिकमानयेत् विलोक्य दिव्यदृष्ट्या तत्तत्त्वं हृदंबुजे … आत्मनि संयोज्य कुर्यादध्ववि
शोधनं उक्तं कलाध्वा तत्त्वाध्वा भुवनाध्वेति तत्त्रयम् वर्णाध्वा पदाध्वा मंत्राध्वेत्यपरं त्रयम् निरूप्य

श्री'
कुं'
२४

कलापंचकलाध्वेति प्रकीर्तितः तत्राधारकृधाभिज्ञा पीवायायांममेदतः षट्सप्तनशिवतत्त्वानि द्वात्रिंशत्
वैसवानिव चतुर्विंशतितत्त्वानि मेत्रः‌शि: प्रकृतेः पुनः उक्तानि द्वात्रिंशत्त्वानि मत्प्रवत्रिपदात्मना तत्त्वानि
शैवान्यथ्यंते शिवः शक्तिः सदाशिवः ई रो विद्यापासार्थं पंचशुद्धानि सर्थनिदि मायाकालावनियतिः
कलाविद्य पुनः स्मृतः रागः पुरुषपतानि षट्शुद्धाशुद्धानि मत्प्रव प्रकृतिर्बुद्धिरहंकारो मनोज्ञानेंद्रियाण्य
थ कर्मेंद्रियाणि तन्मात्राण्यथो भूतानि देशिकाः एतान्याद्वृत्यशुद्धानि चतुर्विंशतिरागमे क्रमादेतानधः
पदसो धयेद्भूरुः मतः पादांघ्रनाभिहृद्गलमूर्धस्वपि शिष्यो स्मरेत् नेत्रे शिष्यस्य बध्नीयान्नेत्रमंत्रेण वास
सा नेत्रमंत्रेण चोद्घाटितिमंत्रेण करेरदीक्षातेशिष्यं कुंडे नेमंडलं नयेत् तस्यांजलिं पुनः पुष्पैः पूरयि
त्वा पिनापयाश्चिपि कलशे देवताग्रीस्मैस्तेपयेन्स्तलमुत्तमम् अपोह्नतेनेत्र मत्रेमासीनदर्भसंस्तरे आ
त्मयागक्रमात्मध्याः संहृत्योत्पाद्य देशिकः तत्रलंत्रोदितान्यासात् कुर्यात्तद्देहे शिष्यो स्तया पंचोपचारै
कुंभस्योपयिते प्रदेवतानाम् गंधादयो निवेद्यांता प्रज्ञापंचोपचारिकः मंडले संस्कृते शिष्यमन्यस्मिन्नपवे
शयेत् तदग्रापंचगव्येषु सार्धं विप्रा विघ्नागुरुः विधिवत्कुंभमुद्धृत्य तन्मुखस्थांस्तरक्रमात् शिष्यो
शिरसि चिन्त्यस्य मातृकां मनसा न्यसेत् स्फलेन साधिते स्तोयैरभिषिंचेत्तमात्मवित् अवशिष्टेन तोये
न शिष्यमाचमयेद्गुरुः उभ्यायशिष्यो विमले वाससी परिधाय च आचम्य वाग्यतो भक्त्या निषीदेत्सन्नि
धौ गुरोः देवतामात्मना शिष्ये संक्रांतं देशिकोत्तमः एतयेद्दंधपुष्पाद्यैरेकां संभावयंस्तयोः निष्कृपाया

राम'
२५

कलाः पंचभूतांवशंक्रयोयतः तस्माद्भूतमयेद्देहे ध्यानानावेधयेत् शिष्यो निवृत्तिर्त्तानुपर्यंतं तलादारभ्य संस्थि
ता शान्तेनानाभिपर्यंत प्रतिष्ठा वाप्यतिष्ठति नाभेः कंठावधि प्राज्ञा विद्या शांतिस्ततः परम् कंठाल्ललाटपर्यं
तेव्याप्ता तस्मात् शिरोवधि शांत्यातीता कलाज्ञेया कलाव्याप्तिरितीरिता इति चिन्त्यस्यां शिष्यो गोदेवतां भाव
येधिया अन्यकमंत्रं ददामीति प्रतिज्ञां श्रावयेत्ततः ददस्वेति वचने नोक्ते तारोच्चारणपूर्वकम् दद्यादिष्टतमस्त
स्मै विनीताया तु पूर्वकम् आदाय ध्यादिकं चोक्तास्मता च देवतां धिया गुरुणा प्रोक्तमात्मभक्त्या शिष्यः प्राचीनम
लस्थितः त्रिवारं दक्षिणे कर्णे वामे चैव तथा स्मृतम् अन्यानामेषविधिः स्त्रीशूद्राणां तु वामके चतुर्थ्यपाठ
यिमान्तशिष्यश्च तेलतलेपुनः अयं च मंत्रश्रावयोः समानफलदो स्मिति श्रुतिर्नि प्रत्यक्षणाद्गुरुः शिष्यस्य प्र
तिरप्य च गुरोर्विधां समालभ्या शोत्तरशतं तपेत् अथवा स्वपतत्त्वाखत्तपेत् मंत्रमतन्यधीः गुरुमंत्रदेवता
नामैक्यं संभावयंधिया प्रणमेद्दंडवद्भूमौ गुरुं तं देवतात्मकम् तस्य पादांबुजद्वंद्वे निजमूर्धियोजयेत् अ
यदक्षिणा उक्तं च ब्रह्मसंहितायां एषा विप्रवचो यस्तस्य तत्त्वानि मानवा प्रभे अदत्त्वा दक्षिणां वापि संया
ति नरकं ध्रुवम् एवं दक्षिणा वस्त्रयुग्मं वा चार्यायनिवेदयेत् इत्यादिना दक्षिणाया आवश्यकत्वं तदेव निवेद
येत् दीक्षांतीति तथा चरुद्रयामले पर ज्ञे दीक्षांते दक्षिणां प्राहुः स्वर्णो भूमिर्धनं वस्त्रं भाजनं वस्त्राक्ष्यपयु
थामासनानि च शरीरमर्थं प्राणांश्च सर्वं तस्मै निवेदयेत् ततः प्रभृति कुर्वीत गुरोः प्रियमनन्यधीः यथा

दिव्यतमंवस्त्रंगुरवेतन्निवेदयेत् गुरवेदक्षिणांदद्यात्प्रत्यक्षायशिवात्मने सर्वस्वंवातदर्धंवातदर्धंवातदाज्ञ
यानचेत्सचारिणीशक्तिः कथमस्यभविष्यति तथाचपार्वतीहरसंवादे सर्वस्वंदक्षिणांदद्यात्गांचदद्यात्
पयस्विनीम् भूमिंहस्तिकरींदद्यात्पुत्रपौत्रानुयायिनीम् तथाचपारिजातेध्ये गुरवेदक्षिणांदद्यात्स्वर्ण
वाससमन्विताम् अथवानैवसिद्धिस्यादभिचारायकल्पते अतिस्म्योदक्षिणांदद्यात्समग्रांप्रीतमानसः
वित्तशाठ्यंविनासर्वंगुरवेसंनिवेदयेत् मंडपंमंडपद्रव्यंगुरवेचसमर्पयेत् अथवाकिंमिदोक्तेनपार्व
तिप्राणवल्लभे गुर्वर्थमतिमात्रंस्वंशरीरमपिसंत्यजेत् तथाचमत्स्यसूक्तेः एकमप्यक्षरंयस्तु
गुरुःशिष्येनिवेदयेत् पृथिव्यांनास्तितद्द्रव्यंयद्दत्वासोऽनृणीभवेत् भोक्तव्यंवानपानीयंमत्स्येभ्योपिनि
वेदयेत् स्वदेभ्योबालकेभ्योयन्नानाभक्ष्यंप्रकल्पयेत् भक्ष्यंभोज्यंतथाचोष्यंलेह्यंपेयंचचर्वणम् आदौ
दत्त्वाचगुरवेविप्रेभ्यस्तदनंतरम् ब्राह्मणांस्तर्पयेत्पश्चात्भक्ष्यभोज्यंसदक्षिणम् गुरुःस्वशक्तिरन्यार्थं
सहस्रंप्रजपेन्मनुम् शिष्यःकुर्यात्प्रयत्नेनगुरोःप्रीतिमनन्यधीः तथाचईशानसंहितायां दीक्षांकृत्वा
यदामंत्रीउपवासंचरेद्यदि तस्यदेवास्सदारुष्टःशापंतेपतिरर्थति दाताराःस्त्रीतानोपोषुःपवासाःक्रि
यंहरेत् भक्ष्यंहविष्यंशाकादिविहितानिफलंपयः एतेसत्कुर्वतःप्रोक्तभक्ष्याण्येतानिसंज्ञितान् तस्मा
दन्नंसमश्नीयात्हविष्यान्नेनशांकरि नन्न एकादश्यादौविस्मृतंमंत्रस्यदानश्रवणात् तद्वचनस्यबाधापत्तेः

कामीननित्यस्याबाधात् इतिचेत् आज्ञायपित्तसेवितमितिवचनस्योपपत्तिः वस्तुतःतद्दिनपरमि
तिभावः एषाकलावतीदीक्षाप्रोक्तासर्वसमृद्धिदा ॥ इत्यागमकल्पलतिकायांचतुर्थःपटलः ॥४॥
होमस्तुनित्यनैमित्तिककाम्यभेदात्सर्वत्रहोमस्यावश्यकत्वमिति तदुक्तंरुद्रयामले नात्तप्तःसिध्यतेमं
त्रोनाहुतश्चकदाचन तपोहोमौभयार्थत्वात्तयाःशुर्तिलक्षणम् अथहोमविधिंवक्ष्येसर्वतंत्रानुसा
रतः तस्यचैकुंडसाध्यत्वादादौतत्रिरूप्यते विप्राणांचतुरस्रंस्यात्राज्ञांवर्तुलमिष्यते वैश्यानामर्धचंद्रा
भंशूद्राणांत्र्यस्रमीरितम् चतुरस्रंतुसर्वेषांकेचिदिच्छन्तितांत्रिकाः तदुक्तंतन्त्रसारसंहितायां आग
मान्तरमस्त्येवकुंडसंख्यापञ्चतत्त्वेः तेन्द्रसंकलमानेनकुंडाद्यपिविधीयते कुंडस्यस्वरूपंज्ञानीयात्पर
मप्रकृतेर्वपुः प्राच्यांशिरःसमाख्यातंबाहूदक्षिणसौम्ययोः उदरंकुंडमित्युक्तंयोनिपादौतुपश्चिमे
सर्वसिद्धिकरंकुंडंचतुरस्रमुदीरितम् सर्वाधिकारिकंकुंडंसर्वदंचतुरस्रकम् चतुरस्रमहेशानि
सर्वकर्माणिसाधयेत् हस्तनियमोयथा गोलमीपे रथादिदोलिकाचैवपोतेप्राकारमेवच सातां
गुलेनकर्तव्यंनान्येनापिकदाचन मुष्टारत्निप्रमाणानियानिकिंचित्थितानिच यजमानस्यकर्तव्यंनान्य
स्यापिकदाचन सातक्रियायामुक्तायामन्यक्तेमानकर्तरि मानकृद्यजमानःस्यादितिप्रायेषनिर्णयः
नतुविप्रान्यगुलाङ्गुहस्तंतत्रविदोविदुः कर्त्तुर्दक्षिणहस्तस्यमध्यमाङ्गुलिपर्वणः मध्यस्यदैर्घ्यमानेन
मानांगुलमुदाहृतम् यजमानसंनिधौ यवानांतंडुलैरेकैमंगुलंचाष्टभिर्भवेत् तथाचोक्तंसारसंग्र

श्री० आ० कुं० २८

६ ॥ अस्यांगुलायवसंख्यांब्रूमोयवोष्टमत्रराहुकः तिलस्तत्पंचमांशःस्यात्षट्संख्याघतिलस्यच तावदे
वाखुलीवारसस्यषष्ठोलवोपरः सर्वत्रैवंचतद्वादेमंगुलंमध्यमांगुले मध्यमायामध्यपर्वतमानं त
स्मात्वविधानिःकरः अदीर्घयोस्तिर्दृस्तंवज्रविंशानिरंगुलैः अष्टभिस्तैर्यवैर्दैर्घ्येमध्यमंसप्तभिर्यवैः
कनिष्ठंषड्भिरुक्तदिर्घेदृस्तंवसुनिसत्तम तथाचवसिष्ठपंचरात्रे ॥ शारदायांच ॥ मुष्टिमात्रकृते
कुंडेपानार्थपरिवर्तते पात्रदोमेरत्निमात्रेहस्तमात्रेसहस्रके भविष्योत्तरे सहस्रेतस्यहोनेचकुर्या
त्कुंडंकरात्मकं द्विहस्तमयुतेतस्यलक्षहोमेचतुःकरम् तथाचज्ञानललितायां ॥ वेदलक्षेषडु
करेचदशलक्षेकराष्टके दशहस्तंचकोट्यांवैहस्तसंख्याव्यवस्थितेति चतुरस्रेचतुःकोणंद्विहस्ता
दिके यामले पूर्वपूर्वस्यकुंडस्यकोणसूत्रेणनिर्मिते उत्तरोत्तरकुंडानांमानंतत्परिकीर्तितम् पूर्व
पूर्वस्यहस्तादिमितस्यकोणसूत्रेणपरिमितेयत्मानेउत्तरोत्तरकुंडानांतदेवपरिभाषकद्विहस्तादिमा
नेनतत्प्रकृतहस्तद्वैगुण्यादिमंतेतथाहेद्विहस्तादिमितस्यचतुर्दृस्तत्वापत्तेः अन्यथोक्तंयामले द्वि
हस्तमयुतेलक्षेचतुर्दृस्तमुदीरितम् दशहस्तेलक्षदृहस्तंकोटौहस्ताष्टकेस्मृतम् अथवा एकह
स्तमितेकुंडेमेकलक्षेविधीयते लक्षाणांदशकंयावत्तावत्दृस्तेनकारयेत् दशहस्तामितंकुंडंको
टिहोमेविधीयते वसिष्ठपंचरात्रेकुंडस्तरूपमाह एकहस्तप्रमाणेनचतुरस्रमुदीरित् यावत्कुंड
स्यविस्तारःखननंतावदिष्यते कुंडानांयादृशोरूपंमेखलायाश्चमाद्दृशम् चतुरस्रंचतुःकोणमित्य राम २८

र्थः ॥ अत्रपंचमेखलादिनापंचमेखलमुक्तंकेचित्त्रिमेखलंकेचिदेकमेखलमात्रंसर्वसमंतत्संत्रिमेखल
मात्रविधीयते तदुक्तंसिद्धान्तशेखरे पंचमेखलांककुर्यात्रत्रिवत्सर्वकुंडके मेखलात्रितयंवाथद्वितयंचैक
मीवचा वेदाग्नितयनोत्सेदमुक्तमत्रतवांगुले तद्वापमेखलोत्सेदंपंचांगुलमितिस्मृतम् तद्वापमेखल
त्सेदंमंगुलद्वितयंक्रमात् चतुर्थअंगुलत्सेदोमेखलाद्वितयस्यच इतिकेचित् कुंडानांमेखलाविस्तारमु
च्छ्रिमात्रेतनःक्रमात् उत्सेदायामतोज्ञेयाह्येकावांगुलसम्मितः अरत्निमात्रेकुंडस्यस्तात्रिकैव्येकांगुला
त्मिकः एकहस्तमितेकुंडेवेदाग्नितयनांगुलाः कुंडेद्विहस्तेलाज्ञेयारसवेदगुणांगुलाः चतुर्दृस्तेतुकुंडे
तावस्तकगुणांगुलाः मेखलानांभवेदंताःपरितोनेमिरंगुलाः मेखलाव्वलचारिमेखलावत् कुंडवेष्टि
तास्तथरिताः तास्वत्वातदेशाद्धापे एकांगुलद्रूपकंदंपरित्यज्योत्खनेनविस्तारेणचेत्यादिक्रमेणवेदा
स्वतारः अश्रयस्तयः नयनेहेरसाष्टगुणास्तयः वसुतर्कगुणाः अष्टपाडवनाचि चैतथावकालोत्तरे
त्वात्वादापेग्नलःकंठःसर्वकुंडेष्वयंविधिः पिंगलामते त्वात्वादेकांगुलंत्यक्त्वामेखलानांविधिर्भवेत् एकह
स्तस्यकुंडस्यवर्धयेत्क्रमात्सुधीः दशहस्तांतमन्येषांमर्धांगुलवशात्पृथक् विस्तरोत्सेदतोज्ञेयामेखला
सर्वतोत्तुथैः एककुंडस्यपश्चिमदिक्कर्तव्यतामाह महादाननिर्णये भुक्तौमुक्तौतथापुष्टौजीर्णोद्धारेतथै
वच सदाहोमेतथाशांतावेकंचकुणदिशातम् शारदातिलके होतरग्रेयोनिरासामुपर्यध्वर्धपत्रवत्
आसांमेखलनामथ्यपत्रवदित्यनेनचतुरंगुलविस्तृतमुन्नता यथोक्तक्रमेणकांगुल्येतेसंकुचितविस्तारः

उक्तं वसिष्ठसंहितायां प्रथमे मेखले योनिं कुण्डोर्ध्वतोऽन्तरगतः कुर्यादेषां शिल्पिनां कुण्डे तन्मध्यलक्षणम्
योनिः षडङ्गुलायामा वत्सरांगुलविस्तृता उन्नतेऽयंगुलः प्रोक्तः कुण्डे हस्तमिते बुधैः नेत्रवेदांगुलोच्छ्रितविस्ता
रोऽत्र नियतो वै मुष्टिरत्निहस्तमात्रे योनितः कुण्डदीरिता द्विहस्तादिषु कुण्डेषु योनिं संवर्धयेत् क्रमात् एकैकांगु
लिमानेन तथान्याभिवर्धयेत् मुष्ट्यरत्न्येकहस्तानां कुण्डानां योनिरीरिता षडष्टवसुद्व्यंगुलायामविस्तारोन्न
तिशालिनी एकांगुलं तयोरन्यं कुर्यादीर्घात्पोमुखम् षडंगुलदीर्घवत्सरांगुलविस्तीर्णा द्व्यंगुलोच्चेत्यर्थः
श्रेकवचनोपात्तत्वादेतत्परिमाणकथनं मुष्ट्यरत्न्येकविषयमिदं एकैकांगुलितो योनिं कुण्डेष्वन्येषु वर्धयेत्
म् यवद्वयक्रमेणैव योन्यग्रमपि वर्धयेत् इति द्विहस्तादिविषयमेतत् अत्र विशेषाभावादायामविस्तारोन्न
तिषु वृद्धिरिति विवेकः तथा च पञ्चरात्रे मेखलानां बहिःस्थाने स्थलमित्यभिधीयते तत्रस्थे तु नालेऽस्या
योन्या मध्ये सरन्ध्रकम् स्थूलमूलात्तु सूक्ष्माग्रं त्रासास्यात् नोरुवा तादृशं मेखलेऽवाऽस्य स्थानमारभ्य
कारयेत् सरन्ध्रकमित्युभयत्र संबध्यते तदुक्तं प्रागुक्तार्थैर्योनौ नालं सरन्ध्रकम् रुद्रयामले योन्या मध्ये
विलं कुर्यात्तदास्याग्राद्विसंज्ञकम् स्थलाद्वलभ्य नालेऽस्या योन्यामध्ये सरन्ध्रकम् नार्पयेत् कुण्डकोणेषु यो
निमांतेत्रविभ्रमः स्थलामेखलारंभस्थलात् अथवा तस्य आलिधिकरणस्थलादित्यर्थः ॥ सरंध्रकं ॥
अश्वत्थार्थकमिति केचित् परिधिस्थापनार्थमिति केचित् तथा च यामले नालमेखलयोर्मध्ये परिधिं
स्थापनायच रंध्रं कुर्यात्तथा विद्वान् द्वितीयमेखलोपरि इति कृते इति वचनेन तन्नालस्य न सरंध्रकता बोध

के किं तु नालमेखलयोः परिधिमात्र तत्संयोगपरिचिह्नं तादृक्मात्रापरिधयश्च तत्र मनवोऽत्रस्थाः त्र
योभवं न्यग्रीवार्णग्रापके यान्तु चतुर्दिशाम् तत्तत्कुण्डानुरूपं वा मानमस्यानिगद्यते प्रागाग्रप्रथितः पश्चाद्
दग्रमतः परम् नसेव्य परिधिमन्यथेदुदगग्रः सम्यकतः अग्न्यग्रच्छिद्ररहिता अथितः अग्रेपार्श्वद्वयेदक्षि
णतस्तन्नमः पश्चान्मध्ये उदगाग्रतन्त्रराये त्रैलोक्यसारे कुम्भद्वयसमायुक्ता अश्वत्थदलवन्नतः अंगुष्ठ
मेखलायुक्तामध्ये वा त्स्थितिस्तथा कुम्भयुक्तसमायुक्ता गज कुम्भकारस्थलदेशायुक्ता नतानश्च अंगुष्ठ
मेखलायुक्ता अंगुष्ठमिति मन्त्रथरितयुता मेखलावेष्टनयुक्ता तथा द्वेद्रवनगलितास्थस्थिता कुण्डे तन्त्र
तोभवतीतिर्थः ॥ अतएवस्तायभवे ॥ अंगुष्ठमात्रोत्कंठाकार्यो दृत्यदलाकृतिः अंगुष्ठमात्रो कु
कुण्डेयस्याससौ तेऽष्टोताग्रे तथा च पंचरात्रे कल्पयेद्दलरेनाभिं कुण्डस्योत्तरसन्निभम् मुष्ट्यरत्न्येकहस्ता
नां नाभिरुच्छ्रयविस्तरम् नेत्रवेदांगुलोपेता कुण्डेष्वन्येषु वर्धयेत् यवद्वयक्रमेणैव नाभिं दर्पयतः अथीः
नाभिदेवं त्रिधा कृत्वा मध्ये कुर्वीत कर्णिकाम् बहिरंशद्वयेनाष्टौ पत्राणि परिकल्पयेत् स्वकस्ववीसंश्रव
त्वामिमं त्रिरणोदितकाम्यया प्रकल्पयेत् स्वचेयागे वक्ष्यमानेन वर्त्मना श्रीपर्णीशिंशिपापालीवशार
त्विषकलमयः पिप्पलाप्लामीशीरीषइति केचित् गर्तीनाविभक्तस्वोर्ध्वं स्वमात्रं पट्टत्रिधातः पुनः पु
नः त्रिधाम्यपोर्ध्व भवेद्दण्डे वेदीरेष्टभिर्भवेत् एकांशोन्नमितः कण्ठः सप्तभागमितमुते वेदीत्र्यंशोनविस्
तारः कंठस्य परिकीर्तितः मानकं दसमानस्यादित्र्यमा सर्वमानयेत् कनिष्ठांगुलिमानेन सर्पिषो

ऊं॰ श्रा॰ क॰ २८

निर्गमायच वेदिमध्येविधातव्याभागेनैकेनकर्णिका विदधीतवद्विलस्यापकोपोनाभितोवटम् त
स्यान्तंत्रिभिर्भागैश्शृतमर्थोपानोवहिः ग्रपौनैकेनपरितोदलानिप्रविकल्पयेत् ग्रदंगात्रेम मेखला
मृत्वेवेद्याःस्यात्परितोर्थयामानतः दंडमेखलाग्रेया कुंभोपुष्णवेदांगले क्रमात् गंडीयुगसमोयोःस्या
तदंडस्यानारुह्यितः पद्भिःईषोःश्वभागोवेयःकूर्माकृतिर्भवेत् दंडस्यस्वामरुस्तितोवायोत्रिणोवा
मृत्तिविन मृत्तस्यस्वस्वभागेस्याः संघोक्तलक्षणःस्कवः स्कवः।वतुर्विंशतिभिर्भागैरारवयेत्स्कवम् १
द्वात्रिंशान्यादंडमानमंशैरेतस्यकीर्तितम् वतुर्विंशैरनादस्यात्कर्णाइयग्राद्विनशिरः ग्रानाग्रोदीर्था
कर्णतोलकद्वयम् ग्रंशाद्वयेनविलिखितेसकेस्यापराकृतिः दंडमेखलाग्रयोर्गंडीभवेत्कर्णाभूपिता १
स्कवस्यविधिनाख्यानामर्वलंज्ञानमारता गंडीकंकगाकुंभयोरित्यमरः तथावोक्तः स्ककस्कवाग्रोवत्व
ग्राधवमहपवसंहितायां पलाशपत्रेनोछिद्रेरुविरेस्कक स्कवोस्मतौ ग्रथकुंडदोपालादविषकर्मा
त्तानापिकीभवेद्धोमीदेनेपेत्वयनत्वयः वकुंडेत्वपसंतापोमरणोछिणमेखले मेखलारहितोषी
कोहर्षिकेपितसंदयः भार्याविनाशःकंकंडेयोक्तयोन्याविनाकृतम् ग्रपमर्थसनेप्योक्तंकुंदेयकेद
वर्जितम् ग्रतएववसिष्ठसंहितायाम् तस्मात्सम्यक्परीक्ष्यैवकर्तव्यंशुभवेदिकम् हस्तमात्रंकुंडलं(
वासंविप्रेहोमकर्मणि क्रियासागरे कुंडमेवंविधंनस्यात्कुंडिलंवासमाश्रयेत् पावदातिलके
नित्यनैमित्तिकेकाम्येस्थंडिलेवासमाचरेत् हस्तमात्रंततःकुर्यात्वतुरस्रंसमंततः महाकपिलपंव राम २८

रात्रे संख्यानुक्तौ शतं साहस्रं संवा तत्पादिषु होमे स्वाहान्ततामाहयज्ञपार्श्वः ग्रादायदक्षिणपाणिनावं
त्रिमध्यरेखविः प्रांगुलावक्रिताग्रेनेत्तत्कुर्यात्तत्तु पाणिना त्रिमध्यरेखतमध्यपार्श्वकाम्यके वक्रिताग्रस्वा
हा मंत्रेणोंकारपोतेनस्वाहान्तेनविचक्षणः स्वाहावसानेतुकुर्यात्ध्यायन्नैमंत्रप्रकाशकः नमोन्तेनतमोद
यात्स्वाहान्तेनहविरेवच श्रुतायामाहुतौवापिसर्वत्रायंविधिःस्मृतः हिरःस्वाहा ठकारेणलिपिसाम्याद्धिठ
रुच्यते तस्यद्वित्वेनविसर्गः सवषाङ्गरूपः वतनोद्विठइतिपरिभाषिकीसंज्ञा ग्रतस्वाहाप्राहुः स्वीय
द्व्यन्यामार्थकः यथाउपविष्टोहोमः स्वाहाकारप्रधानास्तेहोमयज्ञनिरुक्तिशर्मभूतम् स्वाहाकारेणस्वा
हेतिपदेन प्राधान्यस्याहोयाश्रुतः तथा ग्रतएवस्वाहाकारस्यप्रधानार्थतावविस्तृतस्यास्वायमिदंन
वैकृतस्यद्वितीयास्थानमनर्थकंस्यादितिभट्टभाष्यम् यस्तानेपुनःपाठे प्रधानार्थत्वतत्रैवपठ्यमंत्रार्थता१
त्विवरणैनता ग्रतोत्तरत्रीम्यादेनमःस्वाहावापुनर्हीयतेइतिस्मृत्यपाणिनेति सांस्यंतरीयेशास्त्रानरोक्तं
डज्ञानेनैवहस्तेनग्रङ्गुष्ठाग्रेणपीडितम् संहताङ्गुलिपाणिस्तुवाग्यतोजुहुयाद्धविः इतिमहादाननिर्णय
धृतगोभिलीयववनात् नहवनेपरिशिष्टीयमितिमाथवाचार्यः भविष्ये यवकृतिलधृतादीनांस्रुवेनाथोमु
ष्टिनत हुनेतिलान्हुतीश्च देवोप्यज्ञानपाणिना एवंपंचाशतेस्क्राधोसवहुयावार्यं पंचाशतात्वहिरक
क्ताधारयेनश्चात्तशुद्धया इतिवावस्यतिमुद्रमहादाननिर्णयधृतववनात् ग्रग्रेतामात्रितोपिवित्रकृतात्स्वा
र्थसंग्रहे लौकिकेपावकोह्यग्निःप्रथमःपरिकीर्तितः ग्रग्निस्तमाहुतोनामगर्भाधानेविधीयते पुंसवनेचं

क्रि॰ या॰ कौ॰ २७

इत्याद्युक्ते गर्भकर्मणि मारुतोऽनलः सीमंते मंगलो नाम प्रगल्भो जातकर्मणि नाम्नि स्यात्पार्थिवोऽग्निः प्राशने
च शुचिस्तथा सत्यनामाथ चूडायां व्रतादेशे समुद्भवः गोदाने सूर्यनामा च केशांते ह्यग्निरुच्यते वैश्वानरो
विसर्गे च विवाहे योजकः स्मृतः गौरोत्सर्गे गौतमाख्यः संस्कारे चतुर्थ्यां तु शिखी नाम धृतिरग्निस्तथापरे आपदे
धृतिर्होमादौ प्रायश्चित्ते विधुश्चैव पाकयज्ञे तु साहसः प्रायश्चित्ते प्रायश्चित्तात्मकोऽपरस्त्वाहुतिहोमादौ
पाकयज्ञे पावको ऽग्निर्होमे रूपोऽग्निर्गरुडमौलिशा होमादौ लक्षहोमे च वह्निः स्यात्कोटिहोमे हुताशनः पूर्णा
हुत्यां मृडो नाम शान्तिके वरदस्तथा पौष्टिके बलदश्चैव क्रोधोऽग्निश्चाभिचारके कोष्ठे तु जठरो नाम क्रव्यादो
मृतभक्षणे समुद्रे वाडवो गुणविशिष्टतानिरपि सर्वतः पाणिपादंतः सर्वतोऽक्षिशिरोमुखः विश्वरूपो महान
ग्निः प्रणीतः सर्वकर्मसु आहूयेत्यादिकमग्नेर्ध्यानम् अग्निप्रणयनानंतरं सर्वत्रैतस्य पावकस्य ध्यानं प्रणीत
प्रतिमंत्रलिंगात् अन्यथास्य ध्यानानंतरं मंत्राभिधाने युक्तं स्यात् गुणविशिष्टतापि तिरपि आहूयैवं ध्यात्वा
प्रत्येकं विशिनोति नलः तथा अभिमानं तत्कांस्यपात्रेणाग्निप्रणयनं कुर्यात् तस्याभावे ताम्रेण तेनैवाभिमुखमानय
पूर्णायां विशेषमाह सामगानां तु पूर्णाहोममित्यादि मूर्धानं दिवो अरतिं पृथिव्या इति तदादि तराणां पूर्णाहुतिं दीपिकायां च
सिद्धः येषां त्वाम्नाये स्रुक्स्रुवाभ्यां वा जुहुयाद्देवता चंदनं कारयेन्नेत्यर्थः केवलं स्रुवेण कस्यापरस्ये नियमेन प
यात्क्रमयोगतः ततः शांतिं प्रकुर्वीत अवधारणावाचके दक्षिणा च प्रदानं च अग्न्यादीनां विसर्जनम् दीक्षाप्र
योगं च समित्प्रणालीनं च यान्समारतः प्रयतः तानि तत्त्वानि कृत्वा ततः अथ मंडलं प्रयत्नाद्दीक्षामंडपे दीक्षां गायत्र्यां राम २७

मंडलनिर्माणं कुर्यात् ततो दीक्षापूर्वदिने मंडपमध्ये यथोक्तां वेदीं निर्माय तदुपरि सर्वतोभद्रमंडलं कुर्यात् मंडपमं
डलयोर्निर्माणमन्यत्र प्रमाणानुसंधेयं ततो दीक्षादिवसे प्रातः कृतनित्यकृत्यो गुरुर्मंडपद्वारमागत्य बहिरुपलि
प्यतत्र प्राङ्मुखस्तदुदङ्मुखो वा उपविशेत् अथ शिष्यः पूर्वं तु पोषितः शिष्योऽपि तत्राप्याचमनादिकं कृत्वा संकल्पं कुर्या
गुरुश्चैव संकल्पं कुर्यात् संकल्पप्रयोगमाह ओं अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्मा चतुर्वर्गफलप्राप्तिका
मोऽमुकगोत्रस्यामुकदेवशर्मणः श्रीगुरुदेवतायाः परमेश्वरमंत्रदीक्षाकर्मणे तेभिः पाद्यादिभिरभ्यर्च्य भगवंतं मदं
शेन ओं वृतोऽस्मीति प्रतिवचनं ततः शिष्यः पादादितो दीक्षाकर्माकृष्टं तं निवेदयेत् यथाज्ञानतः करणवाणीतिरा
स्तः ततः कृतांजलिः शिष्यो भगवत्पूरस्तास्मत्पितामहकादिपितृगणेभ्यः कलशकुंभपाद्यसाधनमंत्रदीक्षाभिषेके
पूर्वं कं समाप्रसादयेत् ततो गुरुस्तदाज्ञया सकलमंत्रतंत्रान्तरपंक्तिं गृहीत्वा गुरोर्दक्षिणतो जपेत् ततो गुरुः सामान्यार्घ्यस्थापये
त् तद्यथा स्ववामे त्रिकोणमंडलं कृत्वा आधारं तदुपरि संस्थाप्य मं वह्निमंडलाय दशकलात्मने नमः इत्याधारं
संपूज्य फडिति अर्घ्यपात्रं प्रक्षाल्य तदुपरि संस्थाप्य अं सूर्यमंडलाय द्वादशकलात्मने नमः इति पात्रं संपूज्य मम
त्रिया जलेनापूर्य उं सोममंडलाय षोडशकलात्मने नमः इति संपूज्य तस्मिन् जले ओं गंगे च यमुने चैव गोदावरि
सरस्वति नर्मदे सिंधु कावेरि जलेऽस्मिन् संनिधिं कुरु इत्यंकुशमुद्रया तीर्थमावाह्य तत्र प्रणवेन गंधादिना त्रिरिष्य
मूलमंत्रं जप्त्वा धेनुमुद्रां प्रदर्शयेत् एवं प्रकारेणान्यदपि पात्रं स्थापयेत् ततः फडिति मंत्रेण द्वारं संप्रोक्ष्य द्वारपू
जां कुर्यात् तद्यथा द्वारस्योर्ध्वशाखायां मध्ये विघ्नाय नमः तद्दक्षिणे महालक्ष्म्यै नमः तद्वामे सरस्वत्यै नमः १

श्री॰ श्या॰ कं॰ ४

द्वारदक्षिणे विघ्नेशाय नमः गंगायै नमः द्वारवामे क्षेत्रपालाय नमः यमुनायै नमः देहल्यां अस्त्राय नमः एवं प्रति
द्वारे पूजां कुर्यात् ततो गृहं संकोच्य दक्षिणपादपुरःसरं गृहं प्रविशेत् ततः पंचगव्यसामान्यार्घतोयाभ्यां गृहाभ्यं
तरे मंडपसंस्कारवत् प्रोक्षणं कुर्यात् ततः शुद्धस्थले रक्तकंबलाद्यासनमास्तीर्य पूजां पठेत् मेरुपृष्ठ ऋषिः सुत
लं छंदः कूर्मो देवता आसनग्रहणे विनियोगः कृतांजलिः पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धा
रय मां देवि पवित्रं कुरु चासनं इति पठित्वा ह्रीं आधारशक्तिकमलासनाय नमः इत्यासने संपूज्य तदुपरि
स्वस्तिकादिक्रमेणोपविशेत् ततः सिद्धार्थान् समादाय अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः ये भूता वि
घ्नकर्तारस्ते नश्यंतु शिवाज्ञया इति पठित्वा अस्त्राय फट् इत्यनेनाष्टसु दिक्षु विकीर्य पार्ष्णिघातेन भौमानुत्सृज्य त
लाभ्यामास्फोटनेन अंतरिक्षगान् तालत्रयेण दिव्यदृष्ट्या दिव्यानिति त्रिविधविघ्नानुत्सार्य नैऋ
त्यां वास्तोष्पतये नमः ब्रह्मणे नमः इति संपूज्य भूतेभ्यो माषभक्तबलिं ... भूतबलिं दद्यात्
विकिरान् विकिरेत् लाजाः नमः सिद्धार्थभस्मदूर्वांकुशाक्षतान् एकीकृत्य फडिति सप्तधाभिजप्य विधाविकिरे
त् अस्त्रमंत्रेण दर्भाणां मुष्टिना मार्जयेत् तान् विकिरान् तथा वास्त्राय फडिति मंत्रेण कूर्चमुष्टिना वि
किरान् मार्जयेत् सर्वं तं विकिरं ईशान्यां देवतानां आसनाय वायव्यकोणे विष्टरोपरि विदर्भं नीलकंठ कलशाधा
रं स्थापयेत् ततो दक्षिणे पूजाद्रव्याणि सव्ये करकं वामे सलिलार्घ्यपात्रं स्थापयेत् यथाशक्ति चामरादिकं च
ततो वामे गुरुभ्यो नमः दक्षिणे गणपतये नमः मध्ये इष्टदेवतायै नमः ततो भूतशुद्धिं कुर्यात् यथा स्वांके उत्ता

राम॰ ३

तद्देहे हंसः सोहमिति मंत्रेण प्रदीपकलिकाकारं हृदयस्थजीवात्मानं मूलाधारस्थकुंडलिन्या सह शिरस्थ
सहस्रदलकमलकर्णिकांतर्गते परमात्मनि लीनं विचिंत्य पादतो जानुपर्यंते चतुरस्रं वज्रांकं लंयुतं पीतवर्णं भु
वःस्थानं विचिंतयेत् जानोर्नाभिं चंद्रार्धनिभं पद्मेन लांछितम् शुक्लवर्णं वं बीजेन युतं ध्यायेदपां स्थलम्
नाभितः कंठपर्यंते त्र्यस्रं रक्तकम् स्वस्तिकैस्त्रिभिर्लांछितं रं बीजेन युक्तं वह्निमंडलम् कंठाद्भ्रूमध्यपर्यंते कृष्णं वा
योर्मंडलम् षट्कोणं बिंदुभिः षड्भिः युतं यं बीजेन चिंतयेत् भ्रूमध्याद्ब्रह्मरंध्रांतं वर्तुलं ध्वजलांछितम्
शुभ्रवर्णं हं बीजेन युक्तं ध्यायेन्नभःस्थलम् पृथिव्यां लं बीजे तत् जलस्य वं बीजे अग्नेः रं बीजे वायोर्यं आकाशस्य हे
एवं ध्यात्वा तत्तत्स्थानीभूतानि प्रविलापयेत् पृथ्वीमप्सु तथा वह्नौ वह्निं वायौ समीरणं प्रविलाप्य तथाकाशे
आकाशं प्रकृतौ ततः अपरं परमात्मानं मायाशक्तिं परात्मनि इति समस्तदेहादिप्रपंचं परमात्मनि प्रविलाप्य
पापपुरुषाकारभावनाभिभवं संचिंत्य ब्रह्महत्याशिरस्कं स्वर्णस्तेयभुजद्वयम् सुरापानहृदायुक्तं गुरुतल्प
कटिद्वयम् तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकम् उपपातकरोमाणं रक्तश्मश्रुविलोचनम् खड्गचर्मधरं कृष्णं
वामकुक्षौ विचिंतयेत् ततः इडानाड्या वामेन सितधूम्रवर्णं यमिति वायुबीजं षोडशवारं जपेत् वामनासापुटेन वा
युना देहमापूर्य पुनर्यमिति चतुःषष्टिवारं जपन् कुंभकं कुर्वन् देहं संशोष्य पुनर्यमिति द्वात्रिंशद्वारं जपन्
दक्षनासापुटेन वायुं रेचयेत् ततः क्रमेण वायुसंबद्धेन रमिति वह्निबीजेन षोडशवारं जप्तेन दक्षनासापुटेन देह
मापूर्य चतुःषष्टिवारं जप्त्वा कुंभकं कुर्वन् तद्भस्मीभूतमिति विचिंत्य वमिति द्वात्रिंशद्वारं जपन् वामनासया भ

श्रीं ३२

स्तत्वमसद्वायुरेचयेत् ततोरमितिवह्निबीजेन पृथ्वीं प्रकृत्यात्मकं वामनासापुटेन पुरुषात्मकं ललाटवह्निं पृ
थोडषवारं जपनयेत् ततोवमितिवरुणः षष्टिवारं जपनयेत् ललाटवह्नाद्वादिशान्तामृतमयीं वृष्टिं निपात्य
तयादेवोपासनयोग्यसकलेवपुः कुर्वन् लमितिद्वात्रिंशद्वारं जपं दक्षनासापुटेन वायुं रेचयेत् पुनः कृत्वा
दृयेन देहं पवित्रं परमात्मनः परंज्योत्यात्मिकं मायामातृकप्रकृतिपरा ज्ञात्वा तत्तदात्मान्तराकाशं नभसो
मिलः समीरणादभ्रद्वह्निर्वह्नेरापस्ततोमही सेयमेभ्योपि भूतेभ्यस्तत्तोरूपकलेवरम् देवमाराधनेयोग्य
मुत्पन्नमितिभावयेत् तस्मिन्देहे परमात्मा सर्वज्ञः सर्वशक्तिमान् समस्तदेवतारूपा सर्वतेजोमया पृथ आ
त्मरूपेण देहे संजीवभावेन तिष्ठति यजीवभावना मूलाधारहृष्टि दृष्टिरिदोदिता नासापुटे पूरकाद्वायु मवह
म्पदंसः सोहंम्यवतर २ शिवपदाज्जीवशिवं सुषुम्णापथेन प्रविशमूलश्रृंगाटमुल्लस २ ज्वल २ प्रज्वल
२ हंसः सोहंहंसात्मा ततः शक्त्यादीनितत्त्वानि यथास्थाने स्थापयित्वा हृत्पद्मे देवतासमानीय हृदि दृ
र्तिदत्वा आं ह्रीं क्रों हंसः मम प्राणा इह प्राणा आं ह्रीं क्रों हंसः मम जीव इह स्थिताः आं ह्रीं क्रों हंसः
मम सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा एतन्मन्त्रेण प्राणान्नामेन
त्वा हमामे त्रैतीवमतस्यास्ति स्यात् इतिभवतसाहि ततः प्राणायामं कुर्यात् मूलमन्त्रेण वा तारया वा श्रीबी
जेन वा प्राणायामं कुर्यात् यथा श्रीमितिषोडशवारं जपन् वामनासापुटेन वायुना देहमापूर्य पुनः श्रीमि
तिः ततः षष्टिवारं जपन् कुंभकं कुर्वन् पुनः श्रीं द्वात्रिंशद्वारं जपन् दक्षनासापुटेन वायुं रेचयेत् इत्येकः

राम ३२

प्राणायामः एवं षोडशवारं द्वादशवारं वारत्रयं कुर्यात् ततः ऋष्यादिन्यासं कुर्यात् आत्मनो मूर्ध्नि वदने हृदये
च यथाक्रमम् मूर्ध्नि अमुकऋषये नमः मुखे अमुकच्छन्दसे नमः हृदि अमुकदेवतायै नमः कृताञ्जलिरमु
कसिद्ध्यर्थं जपे विनियोगः ॥मातृकान्यासः॥ कश्चिदपि मन्त्रेण क्षुय्यते यथाचक्षणकेनैव तथा सर्वमे
वाणीं विनान्यासं विना लिपिं कृतं तन्निष्फलं विद्यात्तस्मात्सर्वं लिपिं न्यसेत् ततो मातृकान्यासं कुर्यात् वाग्भ
वाया भार्गवा स्याद्विता शक्त्याकामदा श्रीबीजायामप्यैश्वर्यदायिनी मातृकाम्बुजा वाग्भवं पञ्चितारायें क्लीं
श्रीं इति बीजत्रये श्रीबीजं श्रीस्वरूपे तदङ्केसारसंग्रहे मनसा चान्यसंज्ञामातृकास्मै वाच्यवान्यसेत् अस्या
श्च मातृकायोगान्मन्त्रा सर्वकर्मसु धर्मवित्तदत्तिणं दक्षमथो नाभि त्रयो न्यसेत् ब्रह्माऋषिः गायत्री छन्दः
मातृकासरस्वती देवता हलो बीजानि स्वराः शक्तयः मातृकान्यासे विनियोगः शिरसि ब्रह्मऋषये नमः मुखे
गायत्रीछन्दसे नमः हृदि मातृकासरस्वतीदेवतायै नमः गुह्ये हल्भ्यो बीजेभ्यो नमः पादयोः स्वरेभ्यः शक्ति
भ्यो नमः कृताञ्जलिर्मातृकान्यासे विनियोगः ललाटमुखवृत्ताक्षि श्रुतिघ्राणेषु गण्डयो रोष्ठदन्तोत्तमाङ्गा
स्यदोः पत्संध्यग्रकेषु च पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयांसके ककुदंसे च हृत्पूर्वं पाणिपादयुगे तथा
जठराननयोर्न्यसेन्मातृकार्णान्यथाक्रमम् तथा च विन्यसारात्मे ओमाद्यन्तो नमोन्तो वा सबिन्दुर्बिन्दुवर्जितः
पञ्चाशद्वान्तरन्यासः क्रमेणैवं विधीयते श्रीं अं नमो ललाटे श्रीं आं नमो मुखवृत्ते श्रीं इं नमो दक्षिणचक्षुषि
श्रीं ईं नमो वामे श्रीं उं नमो दक्षकर्णे श्रीं ऊं नमो वामे श्रीं ऋं नमः दक्षनासायां श्रीं ॠं नमो वामे श्रीं ऌं नमो

शु.क.यं.१

दक्षांसे श्रीं ल्टं नमो वामे श्रीं पं नमो ऊर्ध्वे श्रीं पं नमो अधरे श्रीं नम ऊर्ध्वदंते श्रीं औं नमो अधोदंते श्रीं अं नमो मूर्धनि श्रीं अः नमो मुखे श्रीं कं नमो दक्षबाहुमूले श्रीं खं नमो कूर्परे श्रीं गं नमो मणिबंधे श्रीं घं नमः अंगुलिमूले श्रीं ङं नमः अंगुल्यग्रे श्रीं चं नमो वामबाहुमूले श्रीं छं नमः कूर्परे श्रीं जं नमो मणिबंधे श्रीं झं नमो अंगुलिमूले श्रीं ञं नमः अंगुल्यग्रे श्रीं टं नमो दक्षोरुमूले श्रीं ठं नमो जानुनि श्रीं डं नमो गुल्फे श्रीं ढं नमो अंगुलिमूले श्रीं णं नमः अंगुल्यग्रे श्रीं तं नमो वामोरुमूले श्रीं थं नमो जानुनि श्रीं दं नमो गुल्फे श्रीं धं नमो अंगुलिमूले श्रीं नं नमः अंगुल्यग्रे श्रीं पं नमो वामो वामोरुमू श्रीं फं नमो जानुनि श्रीं बं नमः पृष्ठे श्रीं भं नमो नाभौ श्रीं मं नम उदरे श्रीं यं नमस्त्वगात्मनि हृदये श्रीं रं नमः असृगात्मनि दक्षमूले श्रीं लं नमो मांसात्मनि ककुदि श्रीं वं नमो मेदात्मनि वामबाहुमूले श्रीं शं नमो म श्रीं षं नमः अस्थ्यात्मनि हृदयादि दक्षिणकरे श्रीं षं नमो मज्जात्मनि हृदयादि वामकरे श्रीं सं नमः शुक्रात्मनि हृदयादि दक्षपादे श्रीं हं नमः प्राणात्मनि हृदयादि वामपादे श्रीं लं नमो जीवात्मनि हृदयादुदरे श्रीं क्षं नमः परमात्मनि हृदयादि मुखे ततो मंत्रन्यासं कुर्यात् अथ करन्यासः अंगुष्ठाभ्यां नमः तर्जनीभ्यां स्वाहा मध्यमाभ्यां वौषट् अनामिकाभ्यां हुम् कनिष्ठाभ्यां वौषट् करतलपृष्ठाभ्यां अस्त्राय फट् अंगन्यासः हृदयाय नम इति तर्जनीमध्यमाभिर्हृदये शिरसे स्वाहा इति तर्जनीमध्यमाभ्यां शिरसि शिखायै वौषट् इति अंगुष्ठेन शिखायां कवचाय हुं इति अंगुलिपंचकेन स्कंधादूरुपर्यंतं नेत्रत्रयाय वौषट् इति तर्जनीमध्यमानामिका

राम
३२

भिर्नेत्रत्रये अस्त्राय फट् इत्यूर्ध्वं तालत्रयं दत्त्वा छोटिकाभिर्दशदिक्बंधनं कुर्यात् ततः स्वदेहे पीठन्यासं कुर्यात् ॐ आधारशक्त्यै नमः कूर्माय नमः अनंताय नमः पृथिव्यै नमः सुधासागराय नमः रत्नद्वीपाय नमः मणिमंडपाय नमः रत्नवेदिकायै नमः रत्नसिंहासनाय नमः इति हृदये अंसद्वयोरुद्वयवदनकटिपार्श्वयुग्मके पुनर्न्यासः प्रदक्षिणेन न्यसेत् ॐ धर्माय नमः दक्षांसे ॐ ज्ञानाय नमः वामांसे ॐ वैराग्याय नमः इति वामोरौ ॐ ऐश्वर्याय नमः दक्षोरौ ॐ अधर्माय नमः मुखे ॐ अज्ञानाय नमः वामपार्श्वे अवैराग्याय नमः इति नाभौ अनैश्वर्याय नमः इति दक्षपार्श्वे पुनर्हृदये आनंदकंदाय नमः संविन्नालाय नमः ॐ सर्वतत्त्वात्मकपद्माय नमः ॐ प्रकृतिमयपत्रेभ्यो नमः ॐ विकारमयकेसरेभ्यो नमः ॐ पंचाशद्बीजाढ्यकर्णिकायै नमः ॐ मं वह्निमंडलाय दशकलात्मने नमः ॐ अं सूर्यमंडलाय द्वादशकलात्मने नमः ॐ उं सोममंडलाय षोडशकलात्मने नमः ॐ सं सत्त्वाय नमः ॐ रं रजसे नमः ॐ तं तमसे नमः ॐ आं आत्मने नमः ॐ अं अंतरात्मने नमः ॐ पं परमात्मने नमः ॐ ह्रीं ज्ञानात्मने नमः ततस्तस्मिन् पीठे शक्तिपीठं समंत्रं पठित्वा अमुकदेवतापीठाय नमः इति न्यासं कृत्वा हृत्पद्मे देवतां ध्यात्वा मानसोपचारैराराध्य मुद्रां प्रदर्शयित्वा नमस्कृत्यार्घ्यपात्रं स्थापयेत् तद्यथा तद्रक्तत्रसारसंहिताया आधारं त्रिपदं चारु षट्पदं वा वृत्तं पदम् अथवा वर्तुलाकारं कुर्यात् देवि मनोहरम् स्वर्णरौप्यशिलाकूर्मकपालालाबुमृण्मये नारिकेलप्रवालं च पद्माक्षिसमं द्वयम् अन्यच्छुभमवक्ष्यते पात्रं कुर्यादिचक्षणः अतिसत्त्वमतिस्थूलं भिन्नं छिद्रं विवर्जयेत् स्वर्णरौप्यताम्राणि सर्व

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी इत्यस्य स्मारकम्

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी इत्यस्य स्मारकम्

सिद्धिकराणि च शुभसूचकपात्राणि सर्व्वपापहराणि च उक्तेष्वेतेषु देवेशि पात्रमेकं प्रकल्पयेत् आत्मदेव
तयोर्मध्ये पात्राणि स्थापयेद्बुधः गुरोः पात्रं आदस्यां तेन तदूर्ध्वे भोगपात्रकम् तदूर्ध्वे शक्तिपात्रं च बलिपात्रं तदंति
के तदग्रे वीरपात्रं च योगिनीनां ततः दक्षिणे पाद्यमाचमनीयं च पात्राणि स्थापयेद्बुधः उक्तसंख्यपात्राणि स्वर्णपा
त्राणि मध्यमम् केचिदिच्छंति मंत्रज्ञः पंचपात्राणि मध्यमम् अथ मंत्रीणि पात्राणि पात्रद्वयं तथैव च देवताह्र
स्तनीमंत्रीएकपात्रं न कारयेत् पंचपात्रपक्षे देवीपात्रं गुरोः पात्रं भोगपात्रं त्रयं मतम् शक्तिपात्रं बलेः पात्रं पंच
पात्रेषु पंचविधिः पंचपात्रेषु शक्तिपात्रं च विज्ञेयं योगिनीनां च तर्पणे मध्यमाचमनीयं च बलेः पात्रास्मरार्थं ने
नैवोर्थपात्रस्थापनम् स्ववामे त्रिकोणमंडलं कृत्वा तदुपरि त्रिपदिकामरोप्य अस्त्राय फडिति प्रक्षाल्य अस्य
तदुपरि संस्थाप्य मूलमंत्रेण पन्न यं रं वह्निमंडलाय दशकलात्मने नमः इति त्रिपदिकां अ
र्कमंडलाय द्वादशकलात्मने नमः इति पात्रं उं सोममंडलाय षोडशकलात्मने नमः इति जलं संपूज्य
ह्रां हृदयाय नमः ह्रीं शिरसे स्वाहा ह्रूं शिखायै वौषट् ह्रैं कवचाय हुम् ह्रौं नेत्रत्रयाय वौषट् ह्रः अस्त्राय फ
ट् षडंगमंत्रैरपि संपूज्य रक्ताभ्यां मात्स्यायतमिति जलेन जलं मत्स्यमुद्रया अस्त्रेण संरक्ष्य कवचेनावगुं
ठ्य धेनुमुद्रयामृतीकृत्य तत्र गंधपुष्पादिकं निक्षिपेत् एवं प्रकारेण तत्पदरवणीयोक्तानि पात्राणि
संस्थाप्य अर्घस्थापनं कुर्यात् तद्यथा प्रथमतो मंडलं गंधादिभिः संपूज्य पात्रेभिः कर्णिकामध्यमाहृत्य
तदुपरि तंदुलाद्धत्वा तदुपरि शंखं निधाय तदुपरि सावधानेन विश्वं संस्थाप्य तदुपरि अर्घं अस्त्राय फडिति प्र

तालिंतांतरे कर्पूरादिसुपूपितेन नीरेण संपूर्य मनोहरम् यथोक्तत्रिगुणतंतुभिर्वेष्टितं चंदनादिभिरलंकृतं पुष्पमा
ल्यालंकृतग्रीवं हरितांकुरसमन्वितम् रत्नचरत्नोदरं विलोमममात्रकां मूलमंत्रेणावतपन्न क्षीरद्रुमपल्लवान्
कुंभवक्त्रे यथोक्तं गंधपुष्पकुसुमैः संगंधितैलैः हरितांतरे अश्वत्थोदुंबरप्लक्षन्यग्रोधाख्याणां पराजि
तानलतावेष्टितं नवपल्लवमुखं दलसफलयवाक्षताखं वस्त्रयुग्मवेष्टितं ॐकारप्रचुरम् भूरत्वी
त्यादिवैदिकमंत्रैर्विष्टरोपरि स्थापयेत् ततः कुंभं कुशाग्रेण स्पृष्ट्वा प्राणप्रतिष्ठां कुर्यात् प्राणप्रतिष्ठामंत्रो
यथा पाशादित्र्यक्षराणां ते स्यात् सद्यपदं पुनः कमाद्यानां उक्तप्राणान् तत्वानि जीव इह स्थितः अमुष्य सर्वेंद्रि
याणि अमुष्य पदं वदेत् वाङ्मनो नयनश्रोत्रघ्राणप्राणपदान्यथ पश्चादिहागत्य सुखं चिरं तिष्ठन्तु वह्नि
ये अयं प्राणमंत्रः प्रोक्तः सर्वजीवप्रदायकः सर्वत्र आंह्रींक्रोंहंसः इत्येवं अमुष्य पदं देयं इति निरूपित
यथा आंह्रींक्रोंहंसः अमुकदेवतायाः जीव इह स्थितः आंह्रींक्रोंहंसः अमुदेवतायाः सर्वेंद्रियाणि वाङ्मनो
नयनश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्राणप्रतिष्ठां कृत्वा दिकरकिरणाकृताकृसमां तु
लो स्वहृदयाद्वहिर्ज्योतिर्मासापुटेन देवतामानीय मूलेन संकल्प्य देवं स्थाप्य स्थापनसंनिधापनसंनिधी
रोधनसकलीकरणावगुंठनामृतीकरणपरमीकरणमुद्राभिर्देवतामावाहनस्थिरदेवीपीठं प्रपूजयेत् ॐ
आधारशक्तये नमः ॐ कूर्माय नमः ॐ अनंताय नमः ॐ पृथिव्यै नमः ॐ सुधासागराय नमः ॐ रत्नद्वीपा
य नमः ॐ कल्पवृक्षाय नमः ॐ रत्नमंडपाय नमः ॐ रत्नद्वीपाय नमः कल्पवृक्षाय नमः रत्नमंडपाय नमः

रत्नवेदिकायनमः ॐमहासिंहासनायनमः इतिसंपूज्य पुष्पं गृहीत्वा देवंध्यात्वा थ देवपुष्पं दत्वा षोडशो
पचारैः पूजयेत् तद्यथा आसनंस्वागतंचार्घ्यंपाद्यमाचमनीयकम् मधुपर्काचमस्नानवसनाभरणानि च
गंधपुष्पेधूपदीपौनैवेद्यंवंदनंतथा प्रयोक्तव्येदर्शनायाउपचारांस्तुषोडश तदुक्तंमानसोल्लासे संपूज्य
त्वदीयमंत्रीउपचारांस्तुषोडश संबुद्ध्यासंबोधनपदेन पूजायथा अमुकदेवतेआसनंकल्पयामिनमः
स्वागतंकुशलंप्रश्नं अमुकदेवतेऽर्घ्यंकल्पयामिस्वाहा इतिमर्घ्यंनिदध्यात् श्रीअमुकदेवतेपाद्यंकल्पया
मिस्वाहा इतिपादयोर्दद्यात् श्रीअमुकदेवतेअपोशानंकल्पयामिस्वाहेतिमुखेदद्यात् श्रीअमुकदेव
तेमधुपर्कंकल्पयामिनमइतिमुखेदद्यात् श्रीअमुकदेवतेआचमनीयंकल्पयामिनमः श्रीअमुकदेव
तेस्नानीयंकल्पयामिनमः श्रीअमुकदेवतेवस्त्रंकल्पयामिस्वाहा श्रीअमुकदेवतेयज्ञोपवीतंकल्पया
मिनमः श्रीअमुकदेवतेआभरणानिकल्पयामिनमः श्रीअमुकदेवतेगंधंकल्पयामिस्वाहा श्रीअमुक
देवतेपुष्पंकल्पयामिनमः श्रीअमुकदेवतेदीपंकल्पयामिनमः नैवेद्यंपुरतः समानीयार्घ्यजलेनफडित्या
यफडितिअस्त्रमन्त्रेणवंइत्यमृतमितिधेनुमुद्रयाअमृतीकृत्यतदुपरिमूलमंत्रंसप्तधाजप्त्वा श्रीअमुकदेव
तेनैवेद्यंकल्पयामिनमः इत्युक्त्वाअमृतोपस्तरणमसिस्वाहाइतिजलंदत्वाप्राणायस्वाहा अ
पानायस्वाहा समानायस्वाहा उदानायस्वाहा व्यानायस्वाहाइतिप्राणादिपंचप्राणाहुतीःकृत्वानस्य
स्वीकारंविभाव्य ॐअमृतापिधानमसिस्वाहा इतिपुनरपोशानंदत्वाश्रीअमुकदेवतेआचमनीयंकल्प

यामिनमः इत्याचमनीयंदत्वाश्रीअमुकदेवतेताम्बूलंकल्पयामिनमः इतिताम्बूलंदत्वा अमुकदेवतायैनमइ
तिपुष्पांजलित्रयेणपूजयेत् तत्रतत्रजलंदत्वाउपचारान्तरे केसरेष्वग्निकोणादिहृदयादीन्पूजयेत् ह्रांहृ
दयायनमः ह्रींशिरसेस्वाहा ह्रूंशिखायैवौषट् ह्रैंकवचायहुम् अग्रेह्रौंनेत्रेभ्योवौषट् पूर्वादिदिक्षु ह्रःअस्त्राय
फट् इतिचतुर्दिक्षुपूजयेत् ततोदेवतावरणानिसंपूज्यदशदिक्षुलोकपालान्पूजयेत् इंद्रमग्निंयमंरक्षोव
रुणंपवनंविधुम् ईशानंपद्मयोनिंचाधोमथऊर्ध्वंपितामहम् यथोक्तदिक्षुप्रतोपूजयेत् ततस्तेषामस्त्राणि च
तुष्पाङ्क्तिंवज्रमसिपाशमंकुशाकेंगदाश्च शूलंचक्रंपद्ममेषामायुधानि क्रमादिह क्रमादायुधान्यपिसंपूज्य
देयमानमंत्रस्यदशसंस्कारान्कुर्यात् तद्यथा जननंजीवनंपश्चात्ताडनंबोधनंतथा अथाभिषेकोविमलीक
रणाप्यायनेतथा तर्पणंदीपनंगुप्तिर्दशैतामंत्रसंस्क्रियाः मंत्राणांमातृकामध्यादुद्धारोजननंमतम् प्रणवां
तरितान्कृत्वामंत्रवर्णान्जपेत्सुधीः एतज्जीवनमित्याहुःमंत्रतंत्रविशारदाः प्रणवान्तरितेति देयमंत्रस्यैकैकवर्णा
नंतरप्रणवंदत्वाजपेदित्यर्थः एतन्मंत्रस्यजीवने मंत्रवर्णान्समालिख्यताडयेच्चंदनांभसा प्रत्येकंवायुनामंत्री
तारनेनताडनंमतम् प्रत्येकमिति देयमंत्रस्यप्रतिवर्णोपरियमितिवायुबीजमुच्चार्यचंदनमिश्रितजलंदद्यात्
इतिमंत्रस्यताडने विलिख्यमंत्रंतन्मंत्रंप्रसूनैःकरवीरजैः तन्मंत्राक्षरसंख्यातैर्हन्याद्येनबोधनम् तात्पर्यहृदादि
मर्थः यानेनेतियकारस्यालोपः तथारमितिबीजेनएतन्मंत्रस्यबोधनम् स्वतंत्रोक्तविधानेनमंत्रीमंत्रस्यसंख्य
याः अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशुद्धये स्वतंत्रोक्तेतिशिवपत्तेपट्टचंदनेनदेवीपत्तेरक्तचंदनेनेत्यर्थः संवि

येमनसामंत्रेज्योतिर्मंत्रेणनिंदन्देन मंत्रीमलत्रयंमंत्रीविमलीकरणंनिदम् ज्योतिर्मंत्रेणहोमितिमंत्रेणामृत
त्रये मायिककार्मणाशारीरसंज्ञकमितिमलत्रयं कुशोदकेनत्रेनप्रत्यर्णप्रोक्षणंमतो नेनमंत्रेणशिखिदेन
दाप्यायनंमतम् नेनमंत्रेणदेयमंत्रेण पतन्मंत्रस्याप्यायने मंत्रेणवारिणामंत्रीतर्पणंतर्पणंमतम् मंत्रेणदेयम
लमंत्रेण तथावमूलमंत्रवृत्तार्थवापुरूमंत्रेनर्पयामीतिप्रयोगः पतन्मंत्रस्यतर्पणं नारंमायारमायोगमनो
दीपनमुच्यते मारंगेमायाह्रीरमाश्रीयोगः संवहः नेनदेयमंत्रस्यादौ ॐह्रींश्रींइतिबीजत्रयंदत्त्वातर्पयेदित्य
र्थः पतन्मंत्रस्यदीपनम् तच्चमानस्यमंत्रस्ययोपवेनप्रकाशनम् स्कंसंस्कारादशमंत्रोक्ताः सर्वतंत्रेषुगोपि
ता पतत्कृत्वासंप्रदायेनमंत्रीवाञ्छितमाप्नुयात् ततोस्तंमंकुर्यात् यथा मामुत्तउपविश्य स्वस्तिवाचनपूर्व
कंसर्वसोमइतिपठित्वा तिलकुशाक्षतान्यादायविकः अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्मावत्सर्व
रीफलप्राप्तिकामः श्रीअमुकदेवतायापदहरमंत्रस्यदीक्षागंकर्मारभत्वश्रीअमुकदेवतायः पदेदहरमंत्रप
र्वकेतिलास्वादिभिरष्टोत्तरसहस्रंप्रातंवाहोमकर्मकरिष्ये इतिसंकल्प पत्नाग्रताइतिपठेन तत्रप्रथमतः
सर्वाधिकारित्वेनत्वतरश्रृंकुंडंनिरूपयामि तत्रसवत्सादिशोमेषास्यादिशोधितेशुरूपलनितेवाशुभेततः
कुर्यात् तत्कुंडविश्वसंदिमायां आदौभूमिपरीक्षनवास्तुज्ञानविशारदः सात्यादौशोधयेयत्नादृष्टवाशु
नवंनतेन पुरुषपुरुषप्रमाणंआदौकुंडस्यखननोमयेनोपलिप्यसामान्यार्थंसंस्थाप्यसामान्यार्घजलेना
भ्युक्षणंवगाथेरभ्युक्षणंकुर्यात् तत्रवत्तुर्विंशांगलप्रमाणंवत्तुरस्त्रनिर्मायाष्टादशसंस्कारांकुर्यात् यथा

प्रागुदाग्नितलके वीक्षणंमूलमंत्रेणप्रोक्षणंप्रोक्षणंमतम् तेनैवत्ताडनंदर्भैर्वर्मणाभ्युक्षणंमतम् अस्त्रेणखन
नो द्धारो हृदयेणपूरणम् समीकरणंमंत्रेणसेचनंवर्मणामतम् कुट्टनेचमितिमंत्रेणवर्मसंमंत्रेणमार्जनम् वि
लेपनंकलारूपकस्यनंतदनंतरम् त्रिसूत्रीकरणपश्चाद्धृदयेनार्चनंमतम् अस्त्रेणवस्त्रेकरणहृन्मंत्रेण
शुभे कुशैः चतुष्पथंतन्मंत्रेणतन्यादक्षपादनम् षोडशकुंडानिसंकुर्यात्संस्कारैरभिरीरितैः मूलमंत्रेणदेयम
लमंत्रेणतत्स्थानेपश्येत् कुमितितत्स्थानमभ्युक्षेत् अस्त्रायफडितिकुंडस्यखननम् यावाकुंडस्यविस्ता
रात्खननंतावदिष्यते अस्त्रायफडितिमस्त्रिकोद्धरणंनमइतिमंत्रेणपूरयेत् मृत्तिकानेरणसमीकरणार्थम
त्रिकोद्धारस्थानेषपूरयेत् अस्त्रायफडितितत्स्थानेसमीकुर्यात् कुमितितत्स्थानेसिंचेत् हूइतिमंत्रेणतत्
स्थानस्यकुट्टनं यथवाअस्त्रायफडितिमंत्रेणवाकुट्टनं कुट्टनेदृढीकरणं अथवाकुमितिमंत्रेणकुट्टनंकुम
मितिमंत्रेणकुंडस्थानेमार्जयेत् नमइतिमंत्रेणतत्स्थानेगोमयेनोपलेपयेत् ततोकुमितिमंत्रेणतत्कुं
डकलारूपेभावयेत् ततोनमइतिमंत्रेणरक्तसूत्रत्रयेणशुक्लसूत्रत्रयेणवामध्येसूत्रंवेष्टयेत् इतिसूत्रीकर
णम् नमइतिकुंडमर्चयेत् अस्त्रायफडितिकुंडंवज्रमेनचिंतयेत् इतिवज्रीकरणं नमइतिमंत्रेणकुशाःकुंडा
भ्यंतरेचतुरश्रंकुर्यात् मध्यश्वामध्यभागः पूर्वसमभागः पश्चिमेन्द्रावारुणीयभागः उत्तरेग्रमायाः दर
क्षिणार्धस्थम् इतिवत्सधीकरणं इतिकेचित् वत्स्तत्कुंडमध्येपूर्वपश्चिमदक्षिणोत्तरक्रमेणकुशाव
तुष्पदानमेवतम् नमइतिमंत्रेणकुंडस्यमध्येमत्वायांदक्षिणपश्चिमोत्तरेषुविष्टरत्रयस्थापनार्थंद्वार

ॐ श्रां कं १६

पंचांगुलप्रमाणांमूलमंत्रेणाभिमंत्रितांकुशानामास्तरेण तथावरायवमहुः शिवरासनमणोर्थमूलमंत्रेणा
ग्रभिमंत्रितम् द्वादशांगुलमानंतत्प्रस्तपारंशकीर्तितम् इत्यस्तपारनम् इत्यग्नेदशसंस्कारान्कुर्यात् ग्र(
थवानामिसंकुर्यात् स्तुभिर्वीक्षणादिभिः यथामूलमंत्रेणकुशायस्तेन ग्रस्त्रायफडितिकुंडेप्रोक्षणेन ग्रस्त्रा
यफडितिदर्भैःकुंडेताडयेत् हूमितिकुंडमभ्युक्षयेत् इतिसंस्कारवन्तंस्थयंकुर्यात् कुंडकरणाशक्तौहस्तप्र
माणंस्थंडिलंकृत्वायथासंभवसंस्कारंकृत्वाहोमंकुर्यात् तदुक्तंरागोपाशानिमर्दिण्यां ॥ ग्रथवास्थंडिलंकृ
त्वाहोमार्थंमत्रिसत्तमः चतुरस्त्रपर्वणाभ्यांदृढंसमासमंसुभम् ग्रथवावर्णायन्येकेस्थंडिलंदृत्लमात्र
कम् वलरंगुलमुत्सेधंवालुकाभिसमंततः इति ततःकुंडमध्ये पूर्वाग्ररेखात्रयंविलिख्यार्घपात्रसंस्था
प्यार्घजलेनतत्किंचिद्सिंचेत् तत्रशुलावस्तुस्तरम् ग्रर्घजलेनरेखामभ्युक्ष्यप्रागग्रायांरेखायांमुकुंदायन
मः द्वितीयरेखायांईशायनमः तृतीयरेखायांपुरंदरायनमः उत्तराग्ररेखायां प्रथमरेखायांब्रह्मणेनमः
द्वितीयरेखायांवैवस्वतायनमः कूर्मायनमः ग्रनंतायनमः पृथिव्यैनमः सुधासागरायनमः रत्नद्वीपाय
नमः कल्पवृक्षायनमः तृतीयरेखायांइंदवेनमइतिसंपूज्यतन्मध्येत्रिकोणंतदुपरिषट्कोणंलिखित्वा ॐकारमु
च्चरन् ग्रर्घजलेनसंप्रोक्ष्यतदुपरिपीठामर्चयेत् यथा ॐग्राधारशक्त्यैनमः कूर्मायनमः पृथिव्यैनमः सु
धासागरायनमः रत्नद्वीपायनमः कल्पवृक्षायनमः रत्नवेदिकायनमः चिंतामणिगृहराजायनमः रत्न
सिंहासनायनमः ग्रानंदकंदायनमः संविन्नालायनमः तत्त्वात्मकपद्मायनमः प्रकृत्यैनमः प्रकृतिमयपत्रेभ्यो

राम
१६ ३६

नमः विकारमयकेसरेभ्योनमः पंचाशद्बीजाढ्यकर्णिकायैनमः ॐधर्मायनमः ॐज्ञानायनमः वैराग्यायनमः
ऐश्वर्यायनमः ग्रधर्मायनमः ग्रज्ञानायनमः ॐग्रवैराग्यायनमः ग्रनैश्वर्यायनमः ॐग्रमुकदेवतासंस्थि
तायनमः इतिपीठंसंपूज्य तन्मध्ये वागीश्वरीमृतुस्नातांनीलेंदीवरसन्निभाम् वागीश्वरेणसंयुक्तांमुपचारैःप्र
पूजयेत् ग्रथवागीश्वरीसहितवागीश्वरीकागच्छेत्यावाह्यइदंपाद्यंवागीश्वरीवागीश्वराभ्यांनमः एषोर्घः इ
त्याद्यादिभिःसंपूज्यवागीश्वरीवागीश्वराभ्यांनमः इतिपुष्पांजलित्रयेणसंपूज्यवागीश्वरीवागीश्वराभ्यांनम
इतिनमस्कुर्यात् ततोग्निमरणिसंभवंसूर्यकांतादिसमुद्भवंश्रोत्रियागारसंभवंवानीयसदक्षिणेकांस्यपात्रेसं
स्थाप्यतस्मादेकांनिष्ठाकारंकृत्वा ॐक्रव्यादेभ्यःस्वाहा इत्यनेनकुंडस्यनैर्ऋत्यादिशिप्रक्षिपेत् ततोवह्निम
नेनवीक्ष्यग्रस्त्रायफडितिग्रर्घजलेनाग्निंप्रोक्ष्यग्रस्त्रायफडितिदर्भैःसंताड्यहूमित्यर्घजलेनवह्निमभ्युक्ष्य त
स्मिन्नाग्नेयांतत्त्वरूपायनमः रींवैदवाग्नयेनमः हूंभौमाग्नयेनमः इतिसंपूज्य ज्वरवैदवभौमाग्नीनामेकाग्निभा
वमितिपावकचैतन्यमस्मिंसमोस्तुरेणवैनाग्निमभिमंत्र्यवमितिधेनुमुद्रयामृतीकृत्यास्त्रायफडितिवह्निमभ्यु
क्ष्यहूमित्यवगुंठ्यवह्निमूलमंत्रेणसंपूज्यवह्निंकराभ्यांधृत्वानत्रोल्लंघनान्स्पृष्टमलीनलः कुंडोपरिस्थित्वाप
रिभ्राम्यात्मनेभिमुखवह्निश्रतावमुखरन्यरम्शिवबुद्ध्यासोहमितिजीवबुद्ध्यावागीश्वर्यायोनौनिक्षिपेत् ततो
वागीश्वरीवागीश्वराभ्यांग्राचमनीयंनमः इतिसंपूज्यकामीश्वरीकामेश्वरयोःसंगमंसंचिंत्य कामीश्वरीगर्भ
नाडीतवेनस्यसंयोज्य ॐमितिकुशोदैर्ग्यायोनिमाक्षाग्रगर्भरक्षार्थंदर्भकंकणंदत्त्वाज्ञानिनीमुद्रांप्रदर्शयेत्

मुद्रालक्षणमाह मणिबंधौ समौ कृत्वा कनिष्ठे निकटोत्तरौ मध्यमे मिलिते कृत्वा तन्मध्येंगुष्ठकं क्षिपेत् वह्निमुद्रे
रीयं ज्वलल्लिंगा मुद्रयानया ततोग्निमंत्रेणाग्निं प्रज्वालयेत् चिन्पिंगल ह्लल२ दह२ पच२ सर्वज्ञाज्ञापय
स्वाहा इत्यग्निप्रज्वालन मंत्रः अग्निं प्रज्वलितं वंदे जातवेदं हुताशनम् सुवर्णवर्णममलं समिद्धं विश्वतो
मुखम् इत्यनेनाग्निमुपस्थापयेत् ततो वह्नेः सात्विकीनां सप्तजिह्वानां स्वदेहे न्यसेत् लिंगपायुशिरोवक्त्र
घ्राणनेत्रेषु सर्वतः वह्निरर्थीशसंयुक्ताः सादियांतास बिंदवः वह्नेर्मंत्राः समुद्दिष्टा जिह्वानां सप्त देविके
पायुर्रेव सर्वतः सर्वांगो व्यापकं न्यसेत् वह्निरेफः ईशो यकारः अर्थी षाडकारः तेन स्वक्रमेण सषश
वलरयः सबिंदु वोबिंदु युक्ताः तेन म्लूं ह्लूं ष्म्लूं श्म्लूं व्लूं ल्म्लूं र्म्लूं य्म्लूं इति वह्नेः सप्तजिह्वामंत्रः प्रकारांतरेण जिह्वाबीजान्या
ह रुद्रयामले ॥ विरोध्याचतिमो वर्णो रेफ षष्ठस्वरस्थितौ इंदुबिंदुसमायुक्तौ जिह्वाबीजान्यनुक्रमात्
आतिमो वर्णो यवर्णः षष्ठ वर्णो यरलव इति यवर्णाः षष्ठसरू इति षष्ठ स्वरः आतिमा वेलो वर्णो विरेफो रेफ रहितो
तेन यरलवषायसहाः तेन स्वक्रमेण सषशवलरयाः इंदुरर्धचंद्रः तच्चंद्रो बिंदुरनुस्वारः तच्चंद्रश्च
र्थः पारदामनसालेशाह जिह्वास्ता त्रिविधाः प्रोक्ता गुणभेदेन कर्मसु हिरण्या गगना रक्ता कृष्णान्या सुप्रभा
मता बहुरूपा तिरक्ता च सात्विकी योगकर्मसु पद्मरागा सुवर्णान्या तृतीया भद्रलोहिता लोहितान्या नरे
श्वेता धूम्रनी च करालिका राजस्यो रसना वह्नेर्विहिता सर्वकर्मसु विश्वमूर्ति विस्फुलिंगिन्या धूम्रवर्णा
मनोजवा रौलोहितान्या कराला चान्या काली नाम स्फुर्ई रिता एता सप्त निवृत्यंते क्रूरकर्मसु कर्मसु स्वसना

मसमाभास्वः जिह्वाः कल्याणरेतसः कल्याणरेतसो वह्नेः प्रथमतः सात्विकीनां स्वदेहे न्यासं कुर्यात् म्लूं हिरण्या
यै नमः लिंगे र्म्लूं गगनायै नमः पादे ष्म्लूं रक्तायै नमः शिरसि श्म्लूं कृष्णायै नमो मुखे व्लूं सुप्रभायै नमो घ्राणे ल्म्लूं ब
हुरूपायै नमो नेत्रे य्म्लूं अतिरिक्तायै नमः सर्वांगेषु न्यसेत् ततो हिरण्या गगना रक्ता कृष्णा सुप्रभा बहुरूपा तिरक्तानां स
प्तजिह्वानामधिदेवता अमरपितृगंधर्वयक्षनागपिशाचकाः राक्षसाः सप्तजिह्वानामीरिता अधिदेवता अमर
स्यादेवः अधिदेवतानामपि स्वदेहे न्यासं कुर्यात् ॐ देवेभ्यो नमो लिंगे पितृभ्यो नमः पादे गंधर्वेभ्यो नमः शिरसि
ॐ यक्षेभ्यो नमो मुखे नागेभ्यो नमो घ्राणे पिशाचेभ्यो नमो नेत्रे हृदये राक्षसेभ्यो नमः सर्वांगे व्यापकं न्यसेत्
वह्नेः नामन्यसेत् नामान्तके नवत्मेन सहस्रार्चिः स्वस्तिपूर्णा उत्तिष्ठपुरुषः पुनः धूमव्यापी सप्तजिह्वो धनर्द
र इतिः क्रमात् वह्नेर्नामानवः प्रोक्ता आदिभिः सहसंयुतः तथा करन्यासं कुर्यात् ॐ सहस्रार्चिषे अंगुष्ठाभ्यां
नमः अंगुष्ठयोः ॐ स्वस्तिपूर्णाय नमः तर्जनीभ्यां नमः तर्जन्योः ॐ उत्तिष्ठपुरुषाय नमः मध्यमाभ्यां नमो म
ध्यमयोः धूमव्यापिने नमो अनामिकाभ्यां नमः अनामिकयोः सप्तजिह्वाय नमः कनिष्ठाभ्यां नमः कनिष्ठयो
धनुर्धराय नमः अस्त्राय फट् करतलपृष्ठाभ्यां नमः करतलपृष्ठयोः ततोंगन्यासं कुर्यात् यथा सहस्रार्चिषे
हृदयाय नमः हृदये स्वस्तिपूर्णाय शिरसे स्वाहा उत्तिष्ठपुरुषाय शिखायै वौषट् धूमव्यापिने नमः कवचा
य हुं स्कंदाय परं पर्यंते ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट् नेत्रत्रये धनुर्धराय अस्त्राय फट् इत्योर्ध्वतालत्रये
छोटिकाभिर्दशदिक्षु बंधीयात् अथ मूर्तिन्यासः स्त्रीरथोत्तनो न्यसेत् दैशिको जातवेदः सप्तार्धपार्श्वक

गुंफकरियावींसकेपुनः पदक्षिणाक्षाम्नसेद्ध्यंतेनाथयाक्रमम जातवेद सप्तजिह्व हव्यवाहनसंज्ञयः ।
अश्वोदरजसंज्ञेयापुनर्वैश्वानरं हृयः कौमारतेजाः स्याद्विश्वमुखोदेवमुखास्तथा ताताग्नेयपदावास्युः अग्नेना च
ङिमेद्गेयः ताताग्नयेइति ॐअग्नयेजातवेदसेनमःइतिहृदि देन्यसेत यथाग्नयेजातवेदसेनमःइतिमूर्द्धि अग्नये
सप्तजिह्वायनमोवत्तपि अग्नयेहव्यवाहनायनमोदक्षपार्श्वे अग्नयेअश्वोदरजायनमोदक्षकटौ अग्नयेवै
श्वानरायनमोपादयोः अग्नयेकौमारतेजसेनमोवामकटौ अग्नयेविश्वमुखायनमोवामपार्श्वे अग्नयेदेव
मुखायनमोवामांसे आसनेकल्पयित्वा ॐवह्न्यासनायनमः इतिसहस्रवह्निंध्यायेत यथापुष्करस्थैता
इष्टिंपाङ्क्तिस्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयंतंजवाभम हेमाकल्पंपद्मसंस्थंत्रिनेत्रंध्यायेद्वह्निंबद्धमौलिं
जटाभिः ॥ इतिध्यात्वामानसैःसंपूज्यमानसैःकल्पयेत ॐइत्यावाह्यपुष्पदत्वाएकीभूतंविचिंत्य ॐवैश्वानरइह
आगच्छइहतिष्ठइत्यावाहनंक्षेपाये ॐवैश्वानरजातवेदइहावहलोहिताक्षसर्वकर्माणिसाधयस्वाहानमः
अर्घ्यंनमः पद्यावमनीये स्नानीयगंधपुष्पधूपदीपनैवेद्यपुंगफलतांबूलीयानितद्वा तांबूलंदत्वापुष्पांजलि
मादाय वह्निंसत्रुत्समध्ये त्रिकोणेयुक्तं तथावोक्तं गणेशाविमर्शितेः ॥ हिरण्याप्रहेमाभाकृष्णालपादितिशिखा
ता वैडूर्यवर्णाकनकाप्राचीदिशिसमास्थिता बहुरूपायथाम्नाय दक्षिणोत्तरसंस्थिता हिरण्यवाक्सगी
रक्ताम्नयतीबहुरूपका सवेरक्तातथाग्नेय्याममतिरक्तावसंस्थिता हिरण्यगातारक्ताकृष्णादक्षाननमास्थि
ताः स्वप्रभावामिरक्तावबहुरूपावामतः सप्तजिह्वाप्रपूजयेत पूर्वेहिरण्यायनमः आग्नेय्यांग

गगनायैनमः नैरृतेरक्तायैनमः पश्चिमेकृष्णायैनमः वायव्येसुप्रभायैनमः ईशानेबहुरूपायैनमः त्रिकोणमध्येअ
तिरिक्तायैनमः इतिसंपूज्यकेसरेषुअंगदेवताःपूजयेत यथाग्निकोणे सहस्रार्चिषेहृदयायनमः नैरृतेस्वस्तिपू
र्णायशिरसेस्वाहा वायव्येउत्तिष्ठपुरुषायशिखायैवौषट् ईशानेधूमव्यापिनेकवचायहुं मध्येसप्तजिह्वायनेत्र
त्रयायवौषट् गोपालपत्रेनेत्राभ्यांवौषट् पूर्वदक्षिणपश्चिमोत्तरेषुपुनर्धरायास्त्रायफट् ततोष्टदलेषुपूर्वा
ग्निदक्षिणनैरृतपश्चिमवायव्योत्तरेशानेषुवह्निमूर्तयःपूज्याः पूर्वेआग्नेयजातवेदसेनमः आग्नेय्यां ॐअग्नयेसप्त
जिह्वायनमः दक्षिणे ॐअग्नयेहव्यवाहनायनमः नैरृतेअग्नयेअश्वोदरायनमः पश्चिमेअग्नयेवैश्वानराय
नमः वायव्येअग्नयेकौमारतेजसेनमः उत्तरेअग्नयेविश्वमुखायनमः ईशानेअग्नयेदेवमुखायनमः ततःपत्रा
ग्रस्थाष्टदिक्षुपूर्वादिक्रमेणेंद्रादिलोकपालान्पूजयेत यथा इंद्रोवह्निर्यमश्चैवनिरृतिर्वरुणस्तथा वायुःकु
बेरईशानोनतोब्रह्मानंतएवच प्राच्यादिदिक्षुसंस्थाप्यसम्यगंधवदेनैः तेषांध्याने पीतोरक्तस्तथानीलः धूम
श्वेतश्चधूम्रकः शुक्लः श्वेतस्तथाप्रोक्ताः अग्रारक्तवर्णाःप्रकीर्तिताः तेषामस्त्राणि वज्रशक्तिदंडासिपाशांकुशगदा
शूलंचक्रंतथापद्मंक्रमतोस्त्राणिपूजयेत अस्त्राणांध्याने कनकरत्ननेत्रोप्यराभ्रवपाह्नदिमनीलनगाभवाल
भासः सितसितललितमौलयोनिजास्त्राभयपाणितत्ववक्त्रसरं पूर्वेलोइंद्रायनमः आग्नेय्यांअग्नयेनमः दक्षि
णेयायमायनमः नैरृतेनैरृतेनमः पश्चिमेवावरुणायनमः वायव्येवायवेनमः उत्तरेयांकुबेरायनमः
ईशानेचईशानायनमः ऊर्ध्वे ॐब्रह्मणेनमः अधः ह्रींअनंतायनमः तदग्रेतेषामस्त्राणिपूजयेत यथापूर्वे व

वै॰ श्रा॰ कं॰ ३८

ल्पायनमः ॐ आग्नेये पावकायनमः दक्षे दंष्ट्रायनमः नैर्ऋते लम्बायनमः पश्चिमे पाशायनमः वायव्ये कृष्णायनमः
याचरेत् होमादिकंजीत यद्यदंगंभवेद्भग्नंतत्संख्याद्विगुणोजपः होमाभावेजपःकार्योहोमसंख्याचतुर्गुणः तथा
वर्णेतमीचे विप्राणांतुद्वियामावसमसंख्यागुणःस्मृतः वैश्यानांचत्रसंख्याकंभेषांत्रीणामयंविधिः यंवर्णिमः
त्रिनाम्नःसवलस्यविधिमाचरेत् इतिपद्मवचनंयद्धवननिषधे तथावयोगिनीहृदये होमकर्मण्यशक्तानांविप्रा
णांद्विगुणोजपः इतरेषांतुवर्णानांत्रिगुणादिसमीरितः इतिसर्वविषयम् एतेनस्त्रीशूद्रस्यापिहोमादिकारइति
तत्र शालवद्यजपाद्धोमाम्बालिग्रामशिलार्चनं मलात् धापनीरामतावैव्यस्त्रशूद्रसंपर्कतनोव्रतेन तस्मात्व

Dr. BHAU DAJI
MEMORIAL
डाक्टर भाऊ दाजी इत्यस्य स्मारकम्

पु॰ श्रा॰ कं॰ ७३

स्नानतर्पणपूर्वैर्जपानामेव होमेधिकारः अष्टद्रव्यहोमानुकल्पहिरण्यात्तदंगं कुर्यात् तथा वचनाद पंचरात्रे त्रयाणां
मेव वर्णानां होमे विधिरुदीरितः अष्टद्रव्यनुकल्पानां तेषां होमात्तु दक्षिणां भवेत् तथा च स्मृतिः अमंत्रस्य तु शूद्रस्य
विप्रो मंत्रेण दापयेत् इति वचनात् होमस्तु ब्राह्मणद्वारैव कर्तव्यः अन्यथा विनियामकाभावात् शूद्रस्य होमयोग्या
दौ शूद्राधिकारापत्तेः तथा च वचनमिदं ब्राह्मणादिवर्णत्रयविषयं तथा च स्त्रीणां होमे नाधिकारः एवं च लात्रिमध
रो पत्नी होमं कन्या प्रयच्छति अनेन विधिना कन्या वरमाप्नोति वांछितम् इति वचनस्य विवाहप्रकरणीयतया पत्न्या
नपत्नीव्यासनामात्रविधायकतया स्त्रीणां होमो ब्राह्मणद्वारैव इतरेषां तु वर्णानां हिरण्यादिसमर्पितं इ
ति वचनं सर्ववर्णविषयमिति एतेन शूद्रस्यापि होमाधिकार इति केचित् तन्न तत्र पतत्वचनार्थाबोधात् एतद्व
चनस्य शूद्रस्य होमविधायकत्वाभावात् शूद्रेतरविषयत्वे इतरेषामिति बहुवचनानुपपत्तेः तस्मात्सर्ववर्णानु
कल्पपरमेतत् ननु अपांते शूद्रमंत्री होम पेत्वन्तदूषणाद्वात इति वचने मंत्रितेनोपादानात् शूद्रस्यापि मांत्रिक
त्वाद्धोमादिकारापत्तिरिति चेन्न स्त्रीशूद्रैर्नाधीयेतामिति निषेधश्रवणात् क्रियामात्रयुक्तकल्पनात् न चास्यापत्यपि
करणविरोध इति वाच्यं विधेरापालकस्याभावकत्वात् तथा तथात्वानुपपत्तिः अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण दापयेत्
इति वचनस्य बोधकत्वात् न च प्रकरणनियंत्रितेति वाच्यं सामान्येनाधकाभावात् श्रद्धाद्यनुपपत्तेश्च तस्मात्
कारिकरणन्यायेन सर्वविषयमिदं तच्च शूद्राणां तत्संकल्पमितिवचनेनात्र शूद्रस्य साक्षात्कर्तृत्वाभिधायकं त्वात्
न्नाकर्तृत्वेनैवोपपत्तेः नच शुल्कपाकौदिज्ञानीयामन्त्रकल्पो विधीयते इति स्मृतिवचनाच्छूद्रस्येवान्नक

पुर॰ ७३

स्येधिकारः शूद्रस्य मोक्षेधिकारो नास्ति कथं तस्य होमानुकल्पविधानमिति वाच्यम् शूद्रस्यानुकल्पभावात् ब्राह्म
णद्वारा होमादिविधानात् तस्मात्स्त्रीशूद्राणां ब्राह्मणद्वारा होमविधिरिति केचित् ननु पुरश्चरणादौ फलश्रवणात्
काम्यमेव तथा च यतीनां कथमत्र समावेशः तथा च भागवद्गीतासु काम्यानां कर्मणां न्यासं सन्यासं कवयो विदुरि
ति वचनात् तेषां काम्यकर्माधिकाराभावात् न तेषां पुरश्चरणाधिकार इति पुरश्चरणत्वावच्छिन्नविधौ भवति पंच
गाकेवलत्वपक्ष यतीनां केवलपुरश्चरणोधिकारो नाविशिष्टश्च न्यर्थ्यः वस्तुतस्तेषां पापक्षयसाधनतया तत्रेषि
कारात् मोक्षार्थित्वात्तत्पादौ तत्प्रवृत्तिर्बाधकाभावात् प्रवृत्तिश्चेदेतत्कर्मणा प्राणायामादौ तत्संपत्त्यंगेरिपि
निधिकहोमाशक्तौ तत्सर्वेषां हिरण्याज्जपः तथा च योगिनीहृदये होमार्थी हिरण्यं वापि जपेत्संख्यां मन्त्रमथी नै
कवाक्सानुपेत्सं वै वहृत्वा सः क्रम्संयुतः परितालामसत्त्वात्तानां दर्शने भावणांकृते स्वतेरिवायुरामनेज्ञंपतेज्जपस्तूत
लेत तथा च प्रयत्नात्रो प्राणायामं च रोगकं कृत्वा सम्यक् जपेत् पोषां यद्वासर्यादिदर्शनम् आदिपदाच्छ्रि
व एवं सिद्धमनन्संज्ञीसाधयेत् कुलेपितामह अथवान्यप्रकारेण पुरश्चरणमिष्यते ग्रहणोकस्य वैदोषाष्टमिविः ह
र्षमुपोषिताः तथांस्रमुद्गपारिश्यानाभिमात्रोदकस्थिताः पर्शादिमुक्तपर्यंते जपेत्संख्यामनन्यधीः तदभावे यद्वा
शुण्णाद्के स्नात्वा शुचिःपूर्वमुपोषिताः ग्रहणादिविमोक्षांते जपेन्मंत्रमनन्यधीः हृष्ट्वा स्नात्वा सुसंकल्प्य विमो
क्षांते जपं चरेत् इति जपान्मंत्रसिद्धिर्भवत्येव न संशयः आपन्नानरोधेन यदिजाप्यस्यते नरः समभेन देवताहो
दीपितत्म्मन्नत्स्यथः इति सनत्कुमारसंहितायां आरक्षमहापुरश्चरणमध्यपतितः आत्मनिवेदनम् यो

पुं० क्रां० कं० ७५

णिनीहृदये कल्पोक्तविधिना मंत्री कुर्याद्धोमे समाहितः अथवानन्तरद्वयोमेन होमं गणस्य समाचरेत् ननु पंचो१
पचारसंतेलोके पुरश्चरणमिष्यते इतिवचनात् पुरश्चरणपदं जपमात्रबोधकमिति कथं होमादि होमतर्पणाभि१
षेकद्विजभोजनानामीति पंचाङ्गपरंप्रसन्नादौ सर्वादयं समारभ्य यावत्स्यथापाचर्थीन्याज्जौ कथा कथनाद्वलात्पु
रश्चरणपदं जपमात्रबोधकमिति कथं होमादिप्रसंगाइतिवचनात् नाववज्ञाधिकं कार्यं ग्रहणांते सुधिः सुमान्
इतिवचनात् नव पुरश्चरणस्य पंचाङ्गबोधकम्यात् सर्वस्यैव तद्बोधकत्वस्यादिति चाच्यं अत्र विशेषोपादानवेय
र्थ्यापत्ते ग्रहण पुरश्चरणे विशेषविधानेन प्रधानतत्स्यनाज्यापनायरत्नेन पंचाङ्गानामष्टपेक्षते मोदेष्यधिकार इ
ति प्रकाशितं तस्माद्वयोरकरणे केवलजपमात्रेण पुरश्चरणेनाधिकारइति सर्वतन्त्रसिद्धांतः अथवदोषरस्मि
न्दिघ्नपशानेवीरसाधने पूर्वाकृत्यमारभ्य पक्षपाते चोपविश्य पंच स्थानादिकं तत्सकलेश्वरार्थं पूर्ववच्चरेत् आ
त्मनापरितः पंच यत्रे देलोपिवादितः पिवादिनर्दयानादितः कालभैरवनामानं महाभैरवसंज्ञकं वटुभैरवभै
रवौ मायधर्मिकं बलिं हरेत् ततः पंचोपचारेण पुरतो देवतां वनेत निमीलयत्तयीपश्चात् देवं ध्यायन्मनं जपेत्
पवसप्यभयं कर्णे नैत्रौ वसेण बंधयेत् यत्र प्रदास्ने चाकर्णाचार्यैर्मावदेत् ततो र्धरात्रपर्यंतं यदि किंचिद्लभ
ते तपदुर्गा नवनावार्येर्थ्यते नैवसर्वधाविपिन् मंत्रस्य दुर्गो हर्षिरस्त्रिणिलाद्या पूर्ववन्निलमुखं लिप्य गणवासग्रपदा
न्यदेवतत्रापि संरक्ष्य प्रतपेत्मनवर्थिकम निर्भयाप्रतपेयावल्सिद्धावाराख्यनेनवः ततः सस्पेकारयिप्राप्तार्थये
हरमन्नमम यदि देवः पार्थयते नरेऊत्तरमेववा दिनांतरे न दास्यामि स्त्रीकृत्यस्य ह तं चत्वेन परेक्षिपूर्ववत् दया१ राम ७५

तृप्तेन नरकं तरान् अयंसर्वयथापूर्वकस्ये स्थापकोत्तमः अथवान्यप्रकारेण पुरश्चरणमिष्यते ग्रहणेकस्य विंदो
र्यावि पूर्वमुपोषितः नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः ग्रहणादिविमोक्षांते जपेन्मंत्रं समाहितः अनेन
तनदशांश होमादिकं चरेत् क्षिगणं वा जपेन्मंत्रं पोषं पूर्ववदाचरेत् नदेनेमंत्रसिद्धिर्यस्य कुलं पुत्रलीपयेत् ने
तन्मंत्रसिद्धिः स्यात् देवता वप्रसीदति अथवा देवताद्वयपत्तरुभक्तात्मनेोपायेन पुरश्चरणकृतोपि मंत्रसिद्धो न संप्रा१
यः अथ प्रयोगसस्यमिष्यपुरश्चरणकर्मणः पूर्वदिने निरामिषमेकवारं भुक्त्वापरदिने नद्यादौ गत्वा स्नानादिकं कृत्वा त१
त्रादिध्यायवैलवासमीपरिथायाचम्य श्रीअमुकदेवतायाः यदक्षरमंत्रस्य पुरश्चरणसिद्धये यथेयं प्राप्नोतेभ्य पिर्मैर
ओमेसिद्धिरास्मिति नदीपर्वतादौ यद्येनच्छ्याग्रामनागरास्य् क्रोशमिते क्रोशद्वयमिते वा हरं गत्वा पुरश्चरणयो
ग्ये स्थलेगत्वा ह्रीमा धीरच्छेदाद्वारिवितस्तिपरिमितानष्टौ कीलकाना गत्वा अस्त्रमंत्रेणाभ्यर्च्य एकादशवारपठादशवा
भिमंत्र्य तेषु वास्त्रमंत्र स्थले गत्वा दिकेत्रमध्ये क्षेत्रपालं संपूज्य तस्मै माषभक्तबलिं दद्यात् यथा क्षेत्रपालमंत्रस्य ब्रह्मा ऋ
षिः क्षेत्रपालो देवता मम पुरश्चरणस्तार्थे विनियोगः क्षां क्षीं क्षूं क्षैं क्षौं क्षः इति करांगन्यासौ कृत्वा पुरश्चरणादिपीठं
संपूज्य वामा ज्येष्ठा रौद्री कालविकरणी बलप्रमथिनी सर्वभूतदमनी मनोन्मनी पीठशक्तीः पूर्वादिके सरेषु मध्ये च
संपूज्य ओं नमो भगवते सकलगुणात्मने शक्तियुक्ताय अनंताय योगपीठात्मने नमः इति पीठं दद्यात् यथा
नीलांजनाद्रिनिभमूर्ध्वपिशंगकेशं वृत्तोग्रलोचनमुपात्तकपालशूलम् आशांबरं भुजगभूषणमुग्रदंष्ट्रं क्षेत्रेश
मद्भुततनुं प्रणमामि देवम् इति ध्यात्वा क्षेत्रपालाय नमः इति गंधादिभिः पूजयेत् केसरेषु अंगानि पूजयेत् पत्रेषु

अनलाग्निकेशाकरालथंडाघरमत्ताकोपपिपितानानर्पिंगलालोर्ध्वकेशानर्चयेत् तद्दिक्षु इंद्रादीन् तद्दिक्षु
धामस्थानेष्वर्चयेत् ततो गंधादिभिः संपूज्य माषभक्तबलिं दद्यादनेन पंचोदिविद्विषि पुरू पुरू भंजय २ नश्य
य २ विध्वय २ महाभैरवक्षेत्रपाल बलिं गृह्ण २ स्वाहा एवं माषभक्तबलिः सपरिवाराय क्षेत्रपालाय नमः
इति सोपदेशौ हृदि सिरे माषभक्तबलिः सपरिवाराय नक्रकपाले दद्यात् ततोऽष्टदिक्षु बलिं दद्यादनेन ॐ रौद्रा
रौद्रकर्माणो रौद्रस्थाननिवासिनः मातरो ग्रहपाश्च गणानामधिपाश्च ये विघ्नभूतास्तथा चान्ये दिग्विदि
क्षु समाश्रिताः सर्वे ते प्रीतमानसाः प्रीत्यार्थं गृह्णंतिमां बलिमित्यष्टदिक्षु बलिं दद्यात् ततः परिगृहीतक्षेत्रस्य
परिसीमां गत्वा पूर्वादिक्रमेणाष्टदिक्षु कीलकानारोपयेदनेन येऽत्र विघ्नकर्तारो दिवि भुव्यंतरिक्षगाः विघ्नभू
ताश्च ये चान्ये मम मंत्रस्य सिद्धिषु मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः अपसर्पंतु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे इ
ति पठन्नष्टदिक्षु कीलकानारोपयेत् ततस्तेषु कीलकेषु पूर्वादिक्रमेणेंद्रादीनावाह्य तन्नाममंत्रैरेव संपूज्यैषु
माषभक्तबलिः इंद्राय नम इति पूर्वादिक्रमेण माषभक्तबलिं दद्यात् पुरश्चरणपूर्वं तत्तीयदिवसे कृत्विग्वात्रमेक
वारं भक्त्या सुविमविशेषानः स्वाध्यायं मंत्रसिद्धिश्चितिवेधकुज्ञानाज्ञानकपापक्षयार्थं मधुनादिनायश्रीजपहृदयाय
स्थित्वैविधायभोजनाच्छादनादिभिर्ब्राह्मणान् संतोष्य वस्त्रालंकारादिभिर्गुरुं संपूज्य तस्यानुज्ञां लब्ध्वा नदस्नानाद
दीनां नवदिने कृत्विग्वात्रीरात्रौ कृत्वा प्रात्यायां प्राकृतं कुर्यात् गुरोरसन्निधाने मनसैव गुरोराज्ञां गृहीत्वा यात्
ततो ब्राह्मे मुहूर्ते उत्थाय प्रातः कृत्यं कृत्वा स्नात्वा नित्यकर्म समाप्य कृदीद्वारमागत्य वस्पदिकयती अन्नामान्नमुद्व

तिलकुशान्जलान्यादाय ॐ अद्येत्यादि अमुकगोत्रः अमुकदेवशर्मा श्री अमुकदेवतायाः अमुकमंत्रस्य सिद्धिका
मोऽद्यारभ्याऽमुकमंत्रस्य यत्संख्यजपं तद्दशांशेन तन्मंत्रकरणकहोमदेवताचिंतनमधिकं ब्राह्मणभोजनसंख्या
नेऽनुतिष्ठेय अत्र होमादिसंख्याविषये वक्ष्यमाणसहस्राणि संख्यात् तथा चोक्तं वाराहीतंत्रे ॥ येषां जपे च होमे च
संख्या नोक्ता मनीषिभिः तेषामष्टसहस्राणि संख्या स्याज्जपहोमयोः तद्दशांशेन कुर्यात्तु संख्याप्यप्रकीर्तिते
दिग्भक्तवरदस्तेयादः ॥ तदुक्तं शारदातिलके संख्या नोक्ता चानेनाष्टसहस्रं वा तथादिशु कृतांजलिः अमुकगोत्रस्यामु
कशर्मणः अमुकदेवता अमुकबीजं अमुकशक्तिः पुरश्चरणजपे विनियोगः इति कृताञ्जलिना तेन संकल्यानंतरं ऋ
ष्यादीन् ततः कृत्वेनिकृतीसमान्यार्थं कृत्वा द्वारदेवतां संपूज्य गृहं प्रवीश्य पार्थं तत्तेनादृग्प्रोक्ष्य अंकं वला आसनेमा
तीर्थं तदुपरि उपविश्य सन्निधाने प्रकल्प्य पीठस्य अग्निकोणे वर्गाणि भवंतु पश्चस्यापश्चिमाते पूर्वक्रमेणागणेशासर
स्वतीदुर्गाक्षेत्रपालांश्च संपूज्य यथोक्तप्रकारेणेष्टदेवतां संपूज्य होमांतकर्म समाप्य बलिं दद्यात् तद्यथा येरौद्रा
रौद्रकर्माण इति पठित्वाष्टदिक्षु बलिं दत्वा भूतबलिं दद्यात् यथा भूतानि यान्येव वसंति भूतले बलिं गृहीत्वा प्रवि
शंत्वपुरे संतोषमासाद्य व्रजंतु सर्वे दासेन तान्यत्र नमोऽस्तु तेभ्यः ततः एतां समाप्य पुष्पमात्राय हृत्पंकजे देवतामान
लोपचारैराराध्य करांकन्यासौ कृत्वा प्राणायामत्रयं कृत्वा यथाशक्ति जपेत् मंत्रस्य श्रोत्रमुखहृदये त्राणि ज्ञात्वा
जपेत् तदुक्तं विश्वसारतंत्रे यथा मंत्रस्य प्राणः श्रोत्रमुखरेफः प्रकीर्तितम् स्वरः वचनापीज्ञेया मे च विद्भिरनं
तरम् अतिरिक्तास्वपदर्णा हृदयं परिकीर्तितम् जपस्यालमाद्य पुरश्चरणेन दीर्घरोगस्तापर्वतसत्तकम् तीर्थप्र

ह्रीं श्री कं १८

देवाः सिद्धलोसंतमायातुमेवनम् उपायानिविविधानिविल्मलंतरंगिरे तत्लसीकाननंगोष्ठंशून्यग्रमपि
वालयः अथवामलकीमूलेगोशालासलमध्यतः देवतायतनेकुर्वेसमुद्रस्यनिकेतटे गृहाणांसन्निधाणां च
विशेकाग्रस्थलेतथा एतस्थलस्थप्रातरारभ्यमध्यदिनेयावत्तन्नाथिकेनतप्रोक्तपसमाप्नोययाविधितर्प
येत् यथात्तलदेवतापीठेविधिवत्तत्राधारणाप्राारिदेवता सकलसकलतर्पयित्वातवदेवतामावायात्तलेनैवसंत्
स्यपरिवारांश्चतर्पयित्वाएकैकात्तलिनातास्तर्पयेत् मूलमुच्चार्यामुकंतर्पयामीतिमंत्रेणात्तलिनातर्पयेत् तथा
यैर्वैवषाम्ड्रैरस्यायथाक्रमात् विनामत्स्यमांसेनपुसलीमेवनंविना मंत्रसिद्धिर्भवतितस्यायत्नपरोभवेत्
कालिकाश्रुतौ ॥ ब्राह्मणात्तपरांदद्याब्राह्मणपादेवुदीयते लताक्रुधिरदद्यात्मालतात्यामवाप्नुयात् तह
क्तंभैरवीतंत्रे ॥ क्षीरेणाब्राह्मणोमत्व्यांश्चतेनतर्पयेद्यात्ते मालिकेर्वैवपवषार्वाच्यासवेत्थइत्तानिभि तनोभि
षिचेत् यतात्मानेदेवताहृत्पंमूलमुच्चार्यामुकदेवतामभिषिंचामीतिशिरसिकुंभमुद्रयाभिषिंचेत् ततोदशां
सेनब्राह्मणभोजनम् भोजनप्रकारमाह ब्राह्मणानामंत्रयत्वआनीयासनेदत्वादेवतास्वरूपेब्राह्मणाविभाव्यम
लेनपाद्यादिभिसंतर्प्यनानारसोपेतमिष्टान्नंभोजयेत् एवंपुरश्चरणसमाप्तौमहतीपूजांविधायदक्षिणांद
यात् तंपक्षुपवस्त्रादैर्ब्राह्मणांतोषयेत् गोभूहिरण्यवस्त्रादैर्गुरुंसंतर्प्यसंतोषयेत् मिष्टान्नंबंधुभिःसह
भुंजीतमहोत्सवंकुर्यात् पाकमलेफलमस्वकृविध्यमनुवोयथा अथवीरमात्रेणास्य पुरश्चरणाकृतये यदि राम। १८

पुरश्चरणेदेवमंत्रसिद्धिर्नजायते तदामंत्रसिद्ध्यर्थमुपायानेतरकर्तव्यम् तदुक्तंगंधर्वतंत्रे समग्रानुष्ठितोमंत्रोयदि
सिद्धिर्नजायते उपायास्तत्रकर्तव्यासप्तशंकरवेदिता भ्रामणंबोधनंवैवपीडनंशोषणं पोषणं दहनांतेक्रमात्
कुर्यात्ततःसिद्धोभवेन्मनुम् भ्रामणाकर्णीवीजेशपथमकमयोगतः तन्मंत्रयंत्रमालिख्यसिद्धकर्दमेकुंकुमे उ
शीरचंदनाभ्यांचमंत्रेसंपरिस्थितेलिखेत् तपांचहस्तनाहोमानभ्रामितःसिद्धिदोभवेत् भ्राविलोपिनसिद्धश्चवोध
नेतस्यकारयेत् सारस्वतीनवीजेनसपुटीकृत्यमनेजपेत् एवंकृतेनवलिसोभवेदेतद्धपीडनं अलक्तंचंदनेनकुंकुं
कृरिद्रामलकेनिला पतैसमंत्रमालिख्यभूर्जपत्रेसुधौभने केवेषांचिद्भवेत्सिद्धाःपीडनंचास्यकारयेत् अ
धरोत्तरयोगेनपदानिपरिवर्तयेत् ध्यायेद्देवतांतद्धदधरोत्तरहूपिणी विपासालिख्यहुनयेत्तलिखिलाक्रम्य
वांधिणा तथाभनेनमंत्रेणहोमःकार्योदिनेदिने पीडितोलत्तयाविधिःसिद्धिस्पादनयाययेत् अपरोत्तरवी
तंक्रीवीजमिमर्थः बालायाविनयंवीत्तमायंतेतस्ययोजयेत् गोक्षीरमधुनालिख्यविद्यापाणौविचारयेत्
पोषितोयभवेत्सिद्धोनोवेत्कुर्यात्सोषणम् बालायास्त्रितयंवीजं पैंक्षीसोवीजत्रयम् हाभ्यांचवायुवीजाभ्यां
मंत्रंकुर्यात्सिद्धिर्भितम् पद्माविद्यागलेधार्यालिखितांवरभस्मना पोषितोपिनसिद्धश्चेत्दहनीयोग्निवीजितः हा
भ्यांवावायुवीजाभ्यांइति यमितिवायुवीजाभ्यांमंत्रस्यप्रस्पदरंपुरितेकुर्यादितिविदर्भितम् वरभस्मनाग्रभस्म
ना आग्नेयेनववीजेनमंत्रस्यैकैकमक्षरम् आग्नेयमथमध्योयोजयेत्तदाहकर्मणि ब्राह्मवृक्षस्यतैलेनमंत्रमा
लिख्यधारयेत् केवदेवोनतोमंत्रःसिद्धःशंकरभाषणात् आग्नेयवीजरमितिवीज ब्रह्मवृक्षस्यपलाशवृक्षस्य

अनुलोमविलोमस्य क्रमेण यावर्णमायया प्रत्येकवर्णयुक्तमंत्राः तु प्रोक्ताः सिद्धिप्रसिद्धिदः वैरिमंत्रा अपि तत्क्षणा१
मन्येमंत्राश्च सिद्धिदाः एतान्वोमात्रकादेवी हृल्लेखाद्यमनुत्रये दीपनं सर्वमंत्राणां सिद्धिदं भवाविशिवः अमनुत्र
यं वेणेंद्री इति वीजत्रयं मंत्रादिष्वसर्वेषु हृल्लेखा कामवीजकम् श्रीवीजं वापि निक्षिप्य त्रयं मंत्रे वसिद्धये हृल्ले
खादौ कामवीजं ह्रीं श्रीं वीजं ह्रीं क्लीं श्रीं इति वीजत्रयं मंत्रादौ दत्वा जपेत् तारं संपुटितं वाथ पुद्दल मंत्रोपि सिद्ध
ति नारायण इति त्रयसंहितायां अथातो मंत्रस्यागविधिः शुचिः समाहितो भूत्वा स्नात्वा तु शुभे दिने अशोक
पुरणवनात्राय देशिकः पयसो वधि तत्रादौ भवने कुंभं दीक्षाविधिमनुक्रमात् मंडले स्थापयेद्विद्वान्द्वारयेत्
लैः शुभैः विलोममंत्रपाठेन तत्राध्यासतु देवताम् सकलीकृत्य संहृत्य चाद्रावरणयजेत् एवमावरणा१
नि प्रमंत्रीमंत्रस्य देवताम् कृत्वा विलोममंत्रेण सविधाना रविहितः ततो यथावत् पुष्पाद्यैर्देवताभ्यो बलिं ह
रेत् दिदिकृत दिक्वनयावत् व्याणिमुं क्रमे अथ रक्षाराधीश शान्तमन्योपवीपते नमस्तुभ्यं रक्षणाम
पुष्पधूपादिकं वलिम् आत्यादित्येनमानायदस्याद्वत्पुर रक्षाणां पुष्पधूपादिवलि तेनक्ष्यत्तिनम् येन
नातसमायादिभिर्नाना समघीनेवलिस्तानावस्यानामस्तुप्रीतोवरदोभव नमस्ते रक्षमानाय निर्ऋतेनमिर्ऋतः
ना रक्षाणा वलि पुष्पादिमयामया निवेदितम् पश्चिमदिक्पालनत्वे नाथ नमोस्तु ते भक्त्या निवेदितं
तोयरक्षीमाश्रीनिमाकृदि प्रभंजन नागायेनमदिशपरिकार्द मयाप्रदत्तं विधिवत् रक्षाणां वलिमादरात्
कुवीनतारकाधीशाय नागाक्षेतारोनमो पुष्पधूपादिभिः प्रीतो भवेमे वरदो मम ईशानमेव भगवान् सर्वविद्या

पद्मभो स्तुतिनापुष्पधूपाद्यैः प्रीतो भवतिभूतये आयादि सर्वभूतानां नाथ प्रपन्नं मम वतनम् रक्षाणां सर्वविघ्नान्मे
निवर्तयनमोस्तुते आगच्छ वरदा यक्ष विलो विघ्नस्य नायक स्तुतिः परया भक्त्या भवते संस्तदोस्तु मम ततः सप
रिवारास्य ह त्रयेत्मंत्रदेवताम् मंत्रेण विपरीतेन पुष्पधूपोपचारकैः ततः तु प्रार्थयेदिंद्रां स्तुतिं तां मंत्रदेवताम् आ
नुकूल्यं समालोच्य मयाल्प वलवुद्धिना यत्कृपाल्ये स्तुतिं न प्रभो मंत्रस्वरूपक तेन मे मनसा लोभं मत्पापं समनिवर्त्य
पापं प्रतिगत भयान्यालदेयात्मनातन ततो तमसकस्मानेपरा कीभक्ति रमे इति संप्रार्थ्य मंत्रं पंचमं त्रवि
लोमतः सितिविमाममकर्दरवंदनेन समर्चयेत् कुलशोप रिसंस्थाप्य भक्त्या परमया पुनः तमप्यमंत्रपत्रचवि१
निक्षिप्य प्रस्तयेत् तत्तीर्थे निम्नगा तीर्थं न तत्लाभ्ये विनिक्षिपेत् ततो पि विप्रान्संमर्च्य यथाशक्त्या प्रभोजयेत्
विविनोदस्य मंत्रोपि स्यात् स्वफलदो नदि इत्थं कृत विधानस्य साधकस्य यथाकूमम भवेच्च तनसंदेहः क्रमा
वितप्रसन्नतः ज्ञायते तेन संपत्रो वर्धते स्वकुले कमात् इति श्रीयदुनाथचक्रवर्तिविरचितायां आगमकल्प
लतिकायां नवमः पटलः १० श्रीरामायनमः ॥ मंत्रोद्धारं प्रवक्ष्यामि सर्वतंत्रानुसारतः येन प्रसंसिद्धाः सर्वेवा१
छितफलमाप्नुयात् तत्र प्रथमतो धर्मार्थकाममोक्षाद्यखिलपुरुषार्थसंपादके श्रीरघुनाथमंत्रे निरूप्यामि
तथा वामकवसिष्ठसंहितायां विनायकरथ श्रेष्ठं देव्यान्यानसमाकरम वसिष्ठवामदेवादिऋषिभिः परिवारितम्
कृतं हैय्यायनेव्याससेरा कुसनत्कुमारस्तनम् समाधिस्थमुनिश्रांते प्रपन्नादित्यतेजसम् गंगातीरे महापुण्ये समासी
नं तपोनिधिम् शौनकः परिपप्रच्छ साष्टांगो प्रणिपत्य च शौनकः भगवन्सर्वतत्त्वज्ञ परमानसम् १

श्री कृ. श्रा. ७८

तत्प्रसादात्तदा मंत्रा विदितास्तव देवो मया कृपया रसहर्षाभ्यां लोचनाभ्यां विलोक्य सच्चिदानंदमात्मानं ज्ञा
त्वा त्वत्पादाश्रयम् इदानीं श्रोतुमिच्छामि मंत्रैः सारं सदार्चनम् रामात्मनावतीर्णस्य विष्णोरमिततेजसः बुद्धि
मे भगवान् सर्वश्रोतेयो रूपास्य वद यदि अस्सौभाग्येन लोकोयं दारिद्रेन वशीकृताः येन सौभाग्यमतुलं मद्दैश्व
र्यसंभवम् ध्यात्वा ज्ञानेकविश्वसर्वज्ञा लेलभेत्वरः श्रीरामः साधुपृष्टं त्वया वत्स कथयेसकलं तव अत्यलौक
थितं पूर्वं वसिष्ठाय महात्मने वसिष्ठोपि स्वयोग्याय मत्पित्रे दत्तवान् मनुम् प्रसन्नहृदयः स्पष्टः पिता मे करुणा
निधिः कृतदेहेमदाकृत्य पूर्वपर्वणि दत्तवान् मया च साधितो मंत्रो तत्पदो मार्चनादिभिः इतः पूर्वं मया नो
क्तो मंत्रराजस्तु कस्यचित् एवं परस्परागच्छ मंत्रा मंत्रेषु दुर्लभे अयोग्यायन दातव्यो मंत्रराजस्तया मुने यत्ने
न गोपयत्वे वरदस्य श्रीप्रसिद्धिदम् अलसं मलिनं क्लिष्टं दंभलोभसमन्वितम् दरिद्रं रोगिनं क्रूरं रागिनं भोगा
लालसम् असूयामत्सरग्रस्तं पापं परुषवादिनम् अन्यायोपार्जितधनं परदाररतं सदा विदुषां वैरिणं नित्य
मज्ञपंडितमानिनम् भ्रष्टव्रतं काष्ठदृष्टिं पिशुनं दुष्टमानसम् बहुभाषिनं क्रूरवेषं सम्प्रगल्भं दुरात्मकम् एतैर्दो
षैर्विहीनं नैव शिष्यं नवकल्पयेत् एकाग्रीयायदि तत्तदोषं प्राप्नोति कमपि स्फुटम् अमात्यदोषो देवानां जायाः
दोषः पतिं यथा तथा शिष्यकृतो दोषो गुरुं प्राप्नोति निश्चितम् तस्मात् शिष्यं गुरुः सम्यक् परीक्ष्य परिगृह्णीत का
येन मनसा वाचा गुरुशुश्रूषणे रतम् अतिभक्तिमासक्तं सदा मोक्षकृतोद्यमम् ब्रह्मचर्यव्रते नित्यं सत्यव्र
तमकल्मषम् प्रसन्नहृदयं शुद्धं मत्पादविमलाश्रयम् परोपकारनिरतं परार्थविगतस्पृहम् स्वचित्तचिन्ते

राम ७८

कृत्यपरितोषकरं गुरुः ईदृशाय शिष्याय मंत्रं दद्यात् यं मंत्रं दद्यात् तन्नामपद्या यथास्य याव देव ज्ञाप्य देवतापदाय चेत
माथ वेषस्याद्यां भक्तिर्मद्दादेवे यथा परा मातापित्रोश्च यथा भक्तिस्तथा कार्या निश्चयेक्षु मंत्रोद्धारः मांतांतर्बिंदुसंयुक्तं नाराय
णाभिभूषितम् बीजमेतत्समुद्दिष्टं बिंदुहीनं पुनः स्वतन्त्रं मोतांते मांतो यकारस्तस्यांते रेफः बिंदुरनुस्वारः तयुक्तं ना
रायणो कारः तयुक्तं एवं रामिति बीजस्य बिंदुहीनं कृत्वा तथा रामिति भवति मांतं वाकारसंयुक्तं मांतांतानतिम्बहरेत्
मांतोवाकारसंयुक्तं इति मांते मकारे तेन नमः इति भवति मांतांतानतिम्बहरेत् इति मांतो यकारः तस्यांते नतिनमः इति
स्यात् तथा च रामाय नमः इति मंत्रः एतत्षडक्षरं मंत्रं सर्वैश्वर्यप्रदायकम् सर्वसौभाग्यजननं सर्वलोकवशंकरम्
विद्यासिद्धिप्रदं नृणां सर्वदा ज्ञानकं ब्रह्मने ऋषिर्ब्रह्मास्य मंत्रस्य गायत्रं छंद उच्यते रामाख्यं चैव संबोधामदेवता परिकीर्ति
ता ज्ञानीयात्र्यमेवर्णात्बीजं प्राक्तिः प्रनितत्था वह्निबीजं हयेन हृदयं परिकीर्तितम् चतुर्थेन तथैवस्यात् शिरो मंत्र
मितीरितम् दससरेण संयुक्तं शिखां मंत्रे विदुर्बुधाः रविस्वरेण संयुक्तं तदेव कवचं विदुः चतुर्दशांकुतेनेत्रं स्वमंत्रवि
सर्गयुक् श्रोक्तानीत्यगानि पूर्वयोरुपलीयुत नत्योरश्रविन्यस्य हृदयादिषु विन्यसेत् अथध्यानतमंत्रस्य च
तेज्ञैलोक्यहंगतम् कुर्यात्वयान्तरंत्यासं समस्तं मंत्रस्य मंत्रवित् ब्रह्मरंध्रे भ्रुवोर्मध्ये हृदि नाभौ च गुह्यके पादयोश्च प्रवि
न्यस्य भावयेद्ज्ञानवानं मुने आधारे भावयेत् पश्चि विदानंदस्वरूपिणीम् उद्यदादित्यसंकाशां माधारेतन्मध्यमध्ये
आधारभावनामेवं संभाव्य मुनिसत्तम तस्मात्समुत्थितं तेजः शिखा इव च चिन्मयी विद्युत्कोटिप्रतीकाशां चंद्रको
टिसुशीतलाम् स्वयं नामस्त्वमप्नीस्याप्याययेद्वपवेशात् ब्रह्मरंध्रान्तये हर्षहृदयांतेष्वमंत्तलम् प्रापय्य विधि

श्री॰ रा॰ कं॰ ७८

नात्युद्यानाचयेद्रत्नत्रयामनम् ततः पश्चिमानलनपद्मसुधाधाराभिराप्लुतम् निजदेहं तदात्मानमेकीभूतं विचिंतये
त् निष्प्रपंचं निराकारं निरवद्यं निरंजनम् अप्रमेयमनन्यापरमं सदसद्भाववर्जितम् अनंतानंदमात्मानं भावयेत्
मुनिसत्तम देवतारूपमेतत्तां भावयेदैक्यमात्मनः एवं संचिंतयेन्मंत्रं मंत्रं प्रतिदिनं जपेत् पदिकोन विन्नाभोगा
भुक्त्वा वांतेयदंड्रेन उपसंहृत्य तत्तेजो यद्वा हृदयपंकजे रामज्योतिर्मयं ध्यायेत्सर्वलोकैकसाक्षिणं जगद्गु
लिसंभ्रमितपरिभ्रमितकरंदरिम देवासुरमुनींद्रैश्च योगींद्रैश्च सेवितम् एवं ध्यात्वा जपेन्मंत्रं षट्सहस्रं दिने दि
ने वाचः क्षियपतिर्भवति सत्वराद् यद्वा कल्पतरोर्मूले सौवर्णमंडपमध्ये तन्मध्ये पुष्पकाख्यं विमा
नं दिव्यमनुत्तमम् मध्ये सिंहासनं तस्य नानारत्नविभूषितम् तन्मध्येऽष्टदलं पद्मं मुद्रादित्यसन्निभम् वीरासनेन त
न्मध्ये समासीनं महामुने सम्यक्ज्ञानमयीं मुद्रां ददानं दक्षिणे करे तेजः प्रकाशयंतं वामं जान्वस्थितं परम्
जानकीवल्लभं देवं द्विभुजं रघुनंदनम् वसिष्ठवामदेवादिमुनिभिः परिवारितम् वामभागे समासीनां सीतां कां
चनसन्निभम् भक्त्या कामदां नित्यां रक्तोत्पलकरांबुजाम् लक्ष्मणं पश्चिमे भागे धृतच्छत्रं सचामरम् पार्श्वभ
रतशत्रुघ्नौ तालवृंतकरावुभौ एवं ध्यात्वा जपेन्मंत्रं ज्ञानलक्ष्मीश्रीसाधनम् सर्वज्ञानैकविलंबपरा
साज्ञापनेऽमुने जपेन्मंत्रं मंत्रयोगी विधीमतम् पुरश्चरणकृत्येन विनापि फलदो मनुः एवं मंत्रं समारा
ध्याराधयंतु पुरुषोत्तमम् तत्रोक्तैर्वै स्वपीठे कुर्यादाराधनं हृदि यथावेदोपचारैस्तु पूजां च तथा प्रोक्तानांसा
भेदाश्च त्वमे अभिगमनमुपादानं योगः स्वाध्यायश्च इज्याः पंचप्रकारास्ताः क्रमेण कथयामि ते तत्राभिग

राम॰ ७८

मनं नाम देवतास्थानमार्जनम् उपलेपननिर्माल्यदूरीकरणमेव च उपादानं नाम गंधपुष्पादिचयनं तथा
योगो नाम स्वदेवस्य आत्मनैवैव भावना स्वाध्यायो नाम मंत्रार्थानुसंधानपूर्वको जपः सूक्तस्तोत्रादिपाठश्च हरे
संकीर्तनं तथा तत्त्वादिशास्त्राभ्यासश्च स्वाध्यायः परिकीर्तितः इज्या नाम स्वदेवस्य पूजनं च यथार्थतः इ
ति पंचप्रकारस्य कथिता तव सुव्रत सार्ष्टिसायुज्यसामीप्यसालोक्यसारूप्यदाः क्रमात् इति अथोच्यते म
हायंत्रं घोरयत्नेदनविशदम् सौभाग्यदं वैष्णवकं त्रिभुवनाप्रकवेपरम् आयुरारोग्यदं पुंसां ग्रहज्वरनिवारण
यंत्रं मंत्रमयं प्रोक्तं मंत्रात्मा देवतेति च पुरा भगवता प्रोक्तं तंत्रसंमोहनाह्वये देहात्मनोर्यथाभेदो मंत्रदेवत
योस्तथा तस्माद्येन महामंत्रं लिखित्वा तत्र पूजयेत् विनायंत्रेण चेत्पूजा देवता न प्रसीदति ततो वक्ष्यामि यं
त्रस्य रूपं स्वरूपदर्शितम् षट्कोणं पूर्वमालिख्य तदग्रेऽष्टदलं लिखेत् बहिरष्टदलं पद्मं मध्ये पार्थिवमंडल
म् एवं मंडलमालिख्य शोभनं चक्रमुत्तमम् अस्मिन्यंत्रे महामंत्रं लिखित्वा तत्र पूजयेत् षट्कोणांतर्लि
खेद्बीजं साध्याख्याकर्मगर्भितम् मन्मथेनैव बीजेन तद्बीजं वेष्टयेद्बुधः अवशिष्टैर्मनोर्वर्णैर्मन्मथं तच्च वे
ष्टयेत् दशाक्षरेण मंत्रेण तत्सर्वं वेष्टयेत्पुनः अग्न्यादिकोणषट्के तु षडंगानि च विन्यसेत् श्रीं श्रीमिति लि
खेत्संधिषु कोणस्य कपोलयोः कोणाग्रेषु वर्णबीजं केसरेषु स्वरान्न्यसेत् ततो मालामनोर्मंत्रैः पूर्वीयष्टद
लेषु च तेषु मंत्रमनुं मंत्री विन्यसेत्क्रमसंख्यया अवशिष्टाः पंचवर्णा विलिखेदष्टमे दले स्तुत्वाकारेण तत्सर्वं
वेष्टयेत्सादिवान्तैः बीजं तु लिखेत्पश्चात् अपरदेदिग्विदिक्ष्वपि नारसिंहं महाबीजं वाराहं च मुनेः क्रमा

न. अस्मिन्यंत्रे समावाहयेत्तयेद्रथनंदनम् अनन्तवदने पांतैर्भेदितामुष्टिकपदम् पंचवृत्तं विलोमेन सम
द्धामवरांतकम् चांतिर्विदुसमायुक्तं तामबीजमुदाहृतम् अनावरदर्पमुच्चार्यज्ञानकीतिपदं ततः पुनः तवत्र
भायेतिसाद्तांतममवपुहरेन् दशाक्षरोयमंत्रस्यात्सर्वसिद्धिःप्रदायकम् जेनमोपदमाभाष्यनतोभगवतेपदम्
रथनंदनायेतिपदमाभाष्यवदमन्त्रमः रत्नोत्रविशायायेति वलर्थपदमुच्चरेत् मधुरश्वसमवदनाय अमितते
जसे बलायेतिपदंपश्चात्ज्ञानमयेतिवदेत्ततः विलेपदमाभाष्यनमोंतेपदमुच्चरेत् मालामंत्रमनुः प्रोक्तः सर्वत्र
त्रारिणाद्विरद्वरैः तकारोरेफ औकारविन्दुभिर्भूषितो मुने नारसिंहो महामंत्रो जपतां कल्पपादपः पंचमस्व
रसंयुक्तो रेफकारो विन्दुभूषितः वाराहबीजमित्युक्तं लक्ष्मीपतेर्वरप्रदम् भादिवत्तरश्रस्याद्दश्वस्त्रविभूषित
म् एतन्मंत्रं समालिख्य सौवर्णे रजतेपटे भूर्जेवाथ समग्रालिख्य गुलकीकृत्य धारयेत् अपुत्रो लभते पुत्रं निर्ध
नो धनमाप्नुयात् किमत्र बहुनोक्तेन सर्वसिद्धिप्रदं नृणाम् यंत्रमेतत्समाख्यातं धारणात्पातकापहम् अ
स्मिन्यंत्रे समावाहय रामं भावयेत्क्रमात् मंडूकादिपृथिव्यंते कर्णिकायां यजेत्क्रमात् अग्न्यादिपीठपा
देषु धर्मादींश्चतुरोन्यसेत् पूर्वादिदिक्षु नामाद्यानिमाह्यान्क्रमाद्यजेत् कर्णिकायां ततश्चानंतं पद्मं संपूजयेत्ततः
नारवर्णशशिग्रार्कवीथीद्रविमंडलम् सत्वत्रयं च सत्वादिरितं तत्प्रात्मवत्तत्वयम् आत्मानंतरात्मपरमात्म
ज्ञानात्मनश्च क्रमात् विमलोत्कर्षिणीज्ञानाक्रियायोगाच पंचमी प्रह्वी च सत्यातथेशानानुग्रहा नवमीच
रा पूर्वादिपत्रेषु कर्णिकायां यजेत्क्रमात् वलद्मानमसाभूतं तैः वैरेव च नामभिः कर्णिकायां

तत्पश्चात्पीठमंत्रेण मंत्रवित् अनाद्यं पूर्वमुच्चार्य नमः पाशांततो वदेत् भगवतेपदमाभाष्य विष्णवेपदमावदेत्
सर्वभूतात्मने वेति वासुदेवाय इत्यपि ततः सर्वात्मसंयोगयोगपीठात्मनेनमः इति मंत्रेण नेत्यर्थीकृत्पीठमुच्यात्र
लिक्रमात् एवं संपीठ्य पीठे देवमावाहयेत् अर्घादिधूपदीपान्तमुपचारैश्च पूजयेत् तमोनुज्ञाप्य देवेशं परि
वारांश्च पूजयेत् पूर्वषट्कोणमध्ये पृष्ठदेशादीनि च क्रमात् वामभागे समासीनं सीतानत्वानुनायतेन श्री वी
नयपूर्वमुच्चार्य सीतायैपदमुच्चरेत् वह्निजायान्वितो मंत्रो भक्तानां कल्पभूरुहः तत्रकोस्मन्नपि प्रोक्तो गायत्रीछंद
उच्यते सीताख्यायात्मिकाशक्तिर्देवताश्रीत्वसात्मयी धारादेवस्य पुरतो वामदक्षिणतः पुनः ततश्चाष्टदलेषु प्रेदून्
मंतेवचावकम् देवस्याग्रे समासीने पत्रिते पूतवस्त्रकम् सुग्रीवमग्निदिक्पत्रे नैऋते दक्षिणदले विभीषणं चैव
नैऋत्ये लक्ष्मणं वारुणदले अंगदं वायुदिक्पत्रे पावनं चोत्तरे दले ईशाने जाम्बवन्तं च द्वितीयावरणे यजेत् अणिमा
दिकं तेन लाभयेत्स्वस्वनामभिः सदिर्स्वितो विजय सुराष्ट्रो राष्ट्रवर्धनः अकोपः धर्मपालश्च सुमंत्रः वाष्टमोम
तः दृष्टयोमंत्रिणः पूज्यास्तृतीयावरणे यजेत् इन्द्रादिलोकपालानन्तेनासां स्यात्यजेत्क्रमात् इंद्रादयं तेनासनंत
वसिष्ठं वामदेवादिमुनीनभिष्टुमस्तात्मनेभिः नतनीलादिभिश्चान्यैरिष्टैर्वानरविष्टरैः परिवारे समासीनं स्वस्वना
मप्रकाशितम् संस्तूयमाने देवेशं वसिष्ठनारदादिभिः एवं सपरिवारांतमाराध्यरथनंदनम् गंधपुष्पादिभिर्दिव्यैर्धू
पैर्दीपश्च सात्विकैः संपूज्य भक्त्या विविधैर्नैवेद्यं परिकल्पयेत् गंधोपचारानखिलांदत्वा पितामहात्मने स्तुत्वा
यथावत्प्रणमेद्भक्तिप्रकाशसाधकः ततः समुद्धरेत्देवं परिवारैः समाहृदि आत्मदेवत्वयोरैक्यं संभाव्यमुनिसः

तम अभ्यर्च्यांघपुष्पाद्यैस्ततः स्तुत्वा समापयेत् एवं प्रतिदिनं कुर्वन् कृतकृत्यो भवेन्नरः अथवा आत्मानं सततं रामं स
भाव्य विचरेत्सुधीः अत्र यंत्रं प्रवक्ष्यामि पुरश्चरणकं विधिम् सिद्धार्थी वाञ्छविध्यामी साधको वत्सभोजनः पश्चि
मादिमुखे देवे मधुपान्मस्यैपिबालये नद्याः समुद्रगामिन्यास्तीरे च हेरम्बासने अश्वत्थबिल्वयोर्मूले सिंधुती
रे तुलाप्राये पर्वताग्रे च ग्रामे स्यान्मेवान्यतमे जपेत् तन्कुलस्य त्रपेत्मं चनपर्येच्छदर्पाधानं तन्कुलस्य षट्
लक्ष बिल्वैः फलैः श्रम्रवचपत्रैर्मिमधुसंयुतैः कुर्यात्दर्शांशतो होमं ततः सिद्धो भविष्यति एवं मंत्राहिभिः सि
द्धे मनोकर्माणि साधयेत् जातीप्रसूनैर्जुहुयाद्वदनो भव समप्रिलो राज्ञवश्याय कमलैर्धीमैर्धान्यादि संपदे
नीलोत्पलानां होमेन वश्याये दखिलं जगत् बिल्वप्रसूनैर्जुहुयादिंदिरावाप्तये नरः इंदिरा लक्ष्मीः दूर्वाहोमे
नदीर्घायुर्भवेत्सुधीर्निरामयः रक्तोत्पलकुलामं श्रीपनमाप्नोति निश्चितम् मेधाकामेन होनव्यं पलाशकुसुमै
नरैः तत्प्रमंधः प्रपिवेत्स विर्भवतिवत्सरात् उत्तमंत्रमंत्रभुक्तीतमदृदानोरणमाप्रयात् मधुत्रितयकेनेवत्त
कुर्याम्पायसेनवा क्षीरसमुद्धोलव्याधिययाधिपणाश्यते यस्तेवं मंत्रनेममालपद्मार्चनादिभिः सीतया
सहितं देवं राघवेन्द्रसमानितम् सभुक्तासकलाभोगानेतेतत्पदमाप्रयात् अथ विवादेननमानुयोयरामा(
त्मनाम्‌ वसरातदृशी भूतेनापाष्यां परिमुच्यमाला ज्ञानायणाम्भूतलमात्रणाम इति वन्दरथचेष्टितस्याष्टद
लकमलस्य कर्णिकामध्ये षट्कोणं तन्मध्ये रांबीजं मध्ये ममाघकं कृत्वा श्रीयमिति साध्यं लिखित्वा समाध्य वी
जं श्रीमिति मध्ययवीजेनवेष्टियत्वा षट्कोणेषु रांरीं हं रें रौं रः इति षड्‌गानि लिखित्वा श्रीमिति कोणकमल(

यो हृमिति वाराहबीजं कोणाग्रेषु अकारादिषोडश स्वरांश्च हृद्ये लिखेत् ततः ॐ नमो भगवते रघुनंदनाय र
क्षोघ्नविशदाय मधुरप्रसन्नवदनायमितते जसेबलाय रामाय विष्णवे नमः इति सप्तचत्वारिंशद्वर्णान्वर्णाष्ट
मेकैकस्मिन्दलेष्टमष्टवर्णाघेवकं लिखित्वा पद्माद्बहिः ॐ ज्ञानकीवल्लभाय स्वाहा इति द्वादशवर्णैर्वेष्टयित्वा का
दिक्षान्तैर्वीवेष्टयेत् चतुरस्रस्यांतः शांगादिदिक्षु ठामिति नारसिंहबीजं समग्रेयादिकोणेषु हृमिति वाराहबीजं(
भूपुरस्याष्टदिक्षु ईश्वरास्थकं च लिखेत् इति रथ्‌नाथस्य धारणयंत्रमेतत्
अनेनैवक्रामेण संपूर्वी ज्ञेरामायहृत्मंतः षडक्षरोयमादिष्टो भक्तानां कामदोमणिः अस्यार्थः अनेनश्याकारः
अग्निरेफः तथायाकारयुक्तो रेफः सेंदुयुक्तः इंदुरनुस्वारः तथा राँ मिति भवति तथाच रांवीजमुद्यम्यरामा
यनमइत्यनुहरेत् तथाचरौं रामाय नम इति षडक्षरो मंत्रो भवति अस्यमंत्रस्य ब्रह्मा ऋषिः गायत्रीछंदः श्रीरा
मचंद्रो देवता यथा चतुर्वर्गसिद्धौ विनियोगः रांहृदयायनमः रीं शिरसे स्वाहा रुं शिखायै वौषट् रैं कवचाय(
हुम् रौं नेत्राभ्यां वौषट् रः अस्त्राय फट् इति षडंगामंत्रः करन्यासानातेन तवमंत्रवर्णान्यासः ब्रह्मरंध्रे रां भ्रूम
ध्ये रां हृदिमां नाभौ यं लिंगेन पादयोर्मः विमलोत्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्येशानीअनुग्रहापरम
पीठपाक्रयः ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मयोगपद्मपीठात्मने नमः इति पीठमंत्रः
ॐ कालांभोधरकांतिकान्तमनिशं वीरासनाध्यासिनं मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि सीतापार्श्व
गतां सरोरुहकरां विद्युन्निभां राघवं पश्यन्तीं मुकुटाङ्गदादिविविधाकल्पोज्वलाङ्गं भजे इति ध्यानम् आव(

रामं
८२

रणष्टत्रायांपार्श्वश्रीसीतायैस्वाहा इतिमंत्रेणसीता अग्रेवामदक्षिणपार्श्वयोः शांगोपांगोयुक्तहदिः केसरेषु आग्नेयादिकोणेषु हृदयशिरःशिखाकवचानि अग्रेऽस्त्रं दिक्षु अस्त्रं देवस्याग्रदलमारभ्यप्रादक्षिण्येनदले षुदत्वमत्स्यग्रीवभरतविभीषणलक्ष्मणाङ्गदपाञ्चजन्यांश्चंद्रातः अग्रादिदलाग्रेषु सुग्रीवनलनीलजयपराक्रम वर्धनधृष्टिजयंतविजयसुराष्ट्र राष्ट्रवर्धनअशोकधर्मपालसुमंत्रोस्तद्बहिर्लोकपालास्तद्बहिस्तदस्त्राणिवजन्नयेत अग्रदलमारभ्यप्रादक्षिण्येनदलमतं सप्तमोधृतपुस्तकं वसिष्ठंवामपार्श्वयोर्धृतचामरौ भरतशत्रुघ्नौलक्ष्मणाय क्षिप्रेयत्नेन वर्णालंकृतपेलत्रंदत्पाणकमले शुभे शत्रुघ्नपादर्क्षितेवक्षेत्रलक्ष्मणानपिभोजयेत इतिरामम ंत्रः अथगोपालमंत्रः गोपीजनानेत्रवदने ह्लमायायाग्निसुंदरीम् अयंदशाक्षरोमंत्रोरुद्राष्टाक्षरफलप्रदः गोपीजनानेत्रवदेदिति गोपीजनपदस्यान्तेवल्लभायस्वादेनिवेदेत इतिदशाक्षरोमंत्रः अग्निसुंदरीस्वाहा अथपरत्रापहतिः प्रातः शिरसिशुक्लेद्वेद्विनेत्रेद्विभुजंगुरुम् वराभयकरंशांतंस्मरेत्तन्नामपूर्वकम् अस्मा नितिमिरांधस्येति शिरसिसहस्रदलकमलेपरमात्मासूर्यरूपः हृदयेजीवात्माग्निरूपः मूलाधारेकुंड लिनीचंद्ररूपा तत्रैतत्त्रयमीकीभूतंविचिंत्यतेनतेजसाश्रीकृष्णस्यसच्चिदानंदरूपेणशरीरमापिवृतं इतिहृदि विचिंत्यतत्रेदेदेयः कोटिकोटिपरार्धानाम्नालोकानामधीश्वर प्रसीदपरमानंदलोनमस्यामिमाधव इतिवाचा मनसाकायेनचश्रीकृष्णप्रणाम्यमूलाधारचक्रे पृथिवीस्थानेरक्तवर्णशिरस्थापावस्ववर्णावतुष्टयपुक्तचत दलेतच्चक्रेकुंडलिनीसूर्यतत्त्वप्रवेशावेष्टनत्पीतलाविकस्वरूपघनानिष्टति मूलाधारस्योपरिमूलाधारा

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

पेत्तलाहर्ष्मेकृषेपत्नादथपकांगुलपरिमितेस्वाधिष्ठानचक्रंवह्निस्थानेछभमयरलवर्णषट्‌युक्तंषट्दलं स्वाधिष्ठानस्योपरिनाभौमणिपूरकचक्रं रक्तागुंजलस्थानेडढणतथदधनपफदशवर्णयुक्तंदशदलंमणिपू रस्योपरिहृदयेअनाहतचक्रंवायुस्थानंककखगघङचछजझञटठद्वादशवर्णद्वादशदलंद्वादश वर्णं अनाहतस्योपरिगलेविशुद्धचक्रंस्वमरस्थानेमाकाशस्थानेच अआइईउऊऋॠऌॡएऐओऔअंअः षोडशस्वरयुक्तंषोडशदलेविशुद्धचक्रस्योपरि भ्रूमध्येआज्ञाचक्रं लाश्वस्थानेआकाशस्थानेच दलयुक्तदल द्वयमितिविचिंतयेत तत्रोमूलाधारस्वाधिष्ठानमणिपूरकस्वाधिष्ठानानिभिन्नामूलाधारेणतेतिभावयेत तत उत्थायमलसर्जनादिस्नानोत्कृत्वाकृत्वापादादिकंप्रक्षाल्यदंतधावनंकृत्वावस्त्रविधिवत्स्नात्वापाये उदकेन वास्नानंकुर्यात ॐकुमारस्याद्यादित्यमंडलाणां गोरोचनमनेनैवगौदाद्वरिसरस्वति इतिमंत्रेणतीर्थमावाह्यतत्ते मूलमंत्रमष्टधाजपेत तस्मिंजलेहरिविचिंतयेत ततःकुंभमुद्रयास्वशिरसिवारत्रयंजलंदद्यात ततोगात्रं मार्जयित्वावसनेकृत्वादेवान्कर्षीन्पितॄन्तर्पयेत ततोपेतमुद्रयाम्बलीकृष्णविमंडलान्तश्रीकृष्णेदगाच्चेस्यांवा सम्मलमुक्तार्थश्रीकृष्णंतर्पयामीतिसंतर्प्य गायत्रीजप्त्वासूर्यायार्घ्यंदद्यात ततोजलात्उत्थायधौतवाससीपरिधा यावम्यम्रक्षालितपाणिपदः पवित्रमुद्राभुकरदक्षिणदत्तनामिकामध्यपर्वोद्रुतेनचेतोर्ध्वतिलकं आवस्मदक्षिण दत्तेनतलंलाटदीप्तानमस्कृतिमंत्रेणवामदक्षेतलंलाटदीप्तावामदक्षिणांगुलिसंयोजितेजलबिंदुभिः स्वाहेतिमंत्रेण स्वशिरःप्रोक्षयेत ततोसायफडितिवामदक्षादक्षिणदत्तेतलंलाटदेस्वायःप्रक्षिपेत ततोगोपीजनवल्लभा

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

ह्रीं श्री का ८३

श्रीविद्महे वासुदेवाय धीमहि तन्नः कृष्णः प्रचोदयात्। इति कृष्णगायत्रीं दशधा जप्त्वानेन मन्त्रेणादित्यमण्डलाय कृ
ष्णायार्घ्यं नमः। इति कृष्णाय त्रैलोक्येऽर्घ्यं दद्यात्। इति मन्त्रसंध्यानन्तरं कृत्वा मण्डपद्वारे उपविश्य द्वारदेवताभ्यो नमः इति
गन्धपुष्पादिना द्वारदेवताः संपूज्य गृहाभ्यन्तरं प्रविश्य ॐ ब्राह्मणेभ्यो नमः वास्तुपुरुषाय नमः इति पूजयेत्। ततो
शुद्धासनेन तदुपरि व्याघ्रचर्म वा तदुपरि कम्बलं तदुपरि वस्त्रं पातयित्वा प्राङ्मुखो बद्धाञ्जलिः मेरुपृष्ठऋषिः सुतलं
छन्दः कूर्मो देवता आसनपरिग्रहणे विनियोगः इति पठित्वा पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धार
य मां लोके पवित्रं कुरु चासनम् इति पृथिवीमन्त्रेण पृथिवीं पूजयेत्। ततः आधारशक्तिकमलासनाय नमः
इत्यासनं संपूज्य तदुपरि स्वस्तिकासनादिना आसनं बद्ध्वा उपविशेत्। स्थापयेद् दक्षिणभागे पूजाद्रव्याणि वा
मतः सुवासितां तु संपूर्णां सव्ये कुम्भं स्थापयेत् प्रक्षालनाय करयोः पृष्ठे पात्रं निधापयेत्। दीपस्य ज्वलितस्या
पि सन्निधाने प्रकल्पयेत्। देवस्य मस्तके कुर्यात् कुसुमोपहितं सदा पूजाकाले देवताया नोपरि भ्रामयेत् करम्॥१॥
वामकपोले गुरुभ्यो नमः। दक्षिणकपोले गणेशाय नमः। मध्ये श्रीकृष्णदेवतायै नमः। इति प्रणम्य अस्त्रराजक
वचाय स्वाहा अस्त्राय फडिति उच्चार्य दक्षिणकरतलपृष्ठयोः संशोध्य ऊर्ध्वोर्ध्वक्रमेण तालत्रयं दत्त्वा नाराचमुद्र
या छोटिकाभिर्दशदिग्बन्धनं कृत्वा त्रैलोक्यं रक्ष २ हुं फट् स्वाहा इति मन्त्रेण जलेनात्मानं वेष्टयित्वा वह्निरि
ति त्रिप्रकारं चिन्तयेत्। ततो भूतशुद्धिं कुर्यात्। यथा स्वाङ्के उत्तानकरौ कृत्वा सोऽहमिति मन्त्रेण प्रदीपकलिकाका
रे हृदयस्थं जीवात्मानं मूलाधारस्थकुण्डलिन्या सह शिरःस्थसहस्रदलकमलस्थपरमात्मनि लीनं विचि

राम ८३

न्तयेत्। ततो जानुपर्यन्तं त्रिकोणं सरक्तकं सस्वस्तिकं रंबीजेन युक्तं वह्निमण्डलम्। कंठाभ्रूमध्यपर्यन्तं कृष्णवा
योर्मण्डलम् षट्कोणं षड्भिः षड्बिन्दुभिर्युक्तं यंबीजेन चिन्तयेत्। भ्रूमध्याद्ब्रह्मरन्ध्रान्तं वर्तुलं स्वच्छं लाञ्छितम् शु
भ्रवर्णं स्वबीजेन युक्तं ध्यायेदाकाशमण्डलम्। पृथिव्यां लंबीजं जले वंबीजं अग्नौ रंबीजं वायौ यंबीजं आकाशे हं
बीजं एवं ध्यात्वा तन्मात्रादीनि भूतानि प्रविलापयेत्। पृथिवीमप्सु जलमग्नौ वह्निं वायौ समीरणं प्रविलाप्य तथा
काशे आकाशमहङ्कारे ततः अपरं स्वरूपं तन्मात्रां प्रकृतौ आत्मनि इति समस्तदेहादिप्रपञ्चं परमात्मनि प्रवि
लाप्य श्यामाकारं भगवतादिभावसंविदं ब्रह्महत्याशिरस्कं स्वर्णस्तेयभुजद्वयम् सुरापानहृदायुक्तं गुरु
तल्पकटिद्वयम् तत्संसर्गिपदद्वन्द्वम् अङ्गप्रत्यङ्गपातकम् उपपातकरोमाणं रक्तश्मश्रुविलोचनम् खड्गचर्म
धरं कृष्णं वामकुक्षौ विचिन्तयेत्। ततः इडाख्येन वामेन नासापुटेन धूम्रवर्णमिति वायुबीजं षोडशवारं जपन् वामनासा
पुटेन वायुना देहमापूर्य पुनर्यमिति बीजं चतुःषष्टिवारं जपन् कुम्भकं कुर्वन् देहं संशोष्य पुनर्यमिति द्वात्रिंशद्वारं
जपन् दक्षनासापुटेन वायुं रेचयेत्। ततो दक्षिणनासापुटेन रमिति वह्निबीजं षोडशवारं जपन् दक्षनासापुटेन
वायुं देहमापूर्य तथा चतुःषष्टिवारं जपन् कुम्भकं कुर्वन् तद्भस्मीभूतमिति विचिन्त्य रमिति द्वात्रिंशद्वारं जपन् वामनासा
पुटेन भस्मना सह वायुं रेचयेत्। ततो ठमिति चन्द्रबीजं शुभ्रवर्णं ललाटे ध्यात्वा वंबीजं षोडशवारं जपयेत्। ततो व
मिति वरुणबीजं चतुःषष्टिवारं जपन् ललाटचन्द्राद्गलितामृतरसपीयूषवृष्टिं विभाव्य तया देवोपासनयोग्यं सकलदेह
म् कुर्यात्। लमिति द्वात्रिंशद्वारं जपन् दक्षिणनासया वायुं रेचयेत्। पुनः समाहितमनाः देहं पवित्रं परमात्मनः प्रा

द्वि॰ श्रा॰ कं॰ ८४

त्र्यात्मिकामायामात्मकः प्रकृतिः परः अव्यक्तात्तन्मात्राकाशोनलश्चोनिलः समीरणाद्वह्निर्वह्ने
रापः ततो मही स्वयमेभ्योपि तेभ्यो हेतोरहं एकं कलेवरम् देवताराधनयोग्यमुत्पन्नमिति भावयेत् अस्मिंदे
हे परात्मा नित्यसर्वज्ञः सर्वशक्तिमान् समस्तदेवतारूपः सर्वतेजोमयः शुभः आत्मरूपेण देहेस्मिन् जीवभावेन तिष्ठ
ति इत्येवं भावनामृत्वाथ हृदि विन्यसेत् ततो हृदि ... आं ह्रीं क्रों यं रं लं वं शं षं सं हंसः मम प्राणा
इह प्राणाः १२ मम जीव इह स्थितः एवं १२ मम सर्वेन्द्रियाणि वाङ्मनः चक्षुः श्रोत्र घ्राण प्राणा इहागत्य
सुखं चिरं तिष्ठन्तु स्वाहा इति बीजं न्यसेत् ततः शिरोवदनहृत्कश्रवणधारणांघ्रोश्चदनहृदये मूर्धशिरोम
स्त्विष्व इति क्रमाद्विन्यसेत् दलञ्चकरपादसन्धिषु तदग्रेषु वामपार्श्वद्वयपृष्ठनाभ्युदरकेषु यान्यात्मा
य हृदयकक्ष्यककुत्करसलदोःपदयुगोदरवक्त्राणां तु यः हृदयत्वेवमनेन पश्चाद्वृन्दन्यसन्तदेवकलेव राम
रसिद्धये तत्र ब्रह्मा ऋषिः गायत्रीछन्दः मातृकासरस्वतीदेवता हलो बीजानि स्वराः शक्तयः मातृका
न्यासे विनियोगः ततः पञ्चाशल्लिपिभिरित्यादिना वाग्देवतां ध्यात्वा नमस्कुर्यात् ततः अग्न्यन्तरं धेनुन्यासादि
मातृकान्यासे समाप्य कीर्त्याव कीर्त्यादिन्यासं कुर्यात् उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदातं पार्श्वद्वंद्वे
जलधिसुतया विश्वधात्र्या च जुष्टं नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं विभ्रंतं वेदेदरकमलकौमो
दकीचक्रपाणिम् ॥ अं केशवाय कीर्त्यै नमः आं नारायणाय कान्त्यै नमः इं माधवाय तुष्ट्यै नमः ईं गोविं राम
दाय पुष्ट्यै नमः उं विष्णवे धृत्यै नमः ऊं मधुसूदनाय शान्त्यै नमः ऋं त्रिविक्रमाय क्रियायै नमः ॠं वामनाय ८५

नमः ऌं श्रीधरायनमः ॡं हृषीकेशायनमः एं पद्मनाभायश्रद्धायैनमः ऐं दामोदरायलज्जायनमः ओं वासु
देवायलक्ष्म्यैनमः औं संकर्षणायसरस्वत्यैनमः अं प्रद्युम्नायप्रीत्यैनमः अः अनिरुद्धायरत्यैनमः कं चक्रिणेज
यायैनमः खं गदिनेदुर्गायैनमः गं शार्ङ्गिणेप्रभायैनमः घं खड्गिणेसत्यायैनमः ङं शंखिनेचण्डायैनमः चं हलि
नेवाण्यैनमः छं मुसलिनेविलासिन्यैनमः जं शूलिनेविजयायैनमः झं पाशिनेविरजायैनमः ञं अंकुशिनेवि
श्वायैनमः टं मुकुन्दायविनोदायैनमः ठं नन्दजायसुनन्दायैनमः डं नन्दिनेस्मृत्यैनमः ढं नरायऋद्ध्यैनमः णं नरक
जितेसमृद्ध्यैनमः तं हरयेशुद्ध्यैनमः थं कृष्णायबुद्ध्यैनमः दं सत्यायभुक्त्यैनमः धं सात्वतायमत्यैनमः नं शौराय
क्षमायैनमः पं शूरायरमायैनमः फं जनार्दनायउमायैनमः बं भूधरायक्लेदिन्यैनमः भं विश्वमूर्तयेक्लिन्नायैन
मः मं वैकुण्ठायवसुधायैनमः यं त्वगात्मनेपुरुषोत्तमायवसुदायैनमः रं असृगात्मनेबलिनेपरायैनमः लं मां
सात्मनेबलानुजायपरायणायैनमः वं मेदआत्मनेबालायसूक्ष्मायैनमः शं अस्थ्यात्मनेवृषघ्नायसन्ध्यायैनमः
षं मज्जात्मनेवृषायप्रज्ञायैनमः सं शुक्रात्मनेहंसायप्रभायैनमः हं प्राणात्मनेवराहायनिशायैनमः ळं शक्त्यात्म
नेविमलायअमोघायैनमः क्षं क्रोधात्मनेनरसिंहायविद्युतायैनमः इतिमातृकास्थानेषुन्यसेत् श्रीकामश्चे
त् श्रीं अं केशवायकीर्त्यैनमः इत्यादिन्यसेत् अथ मं नमःपरायजीवतत्त्वात्मनेनमः भं नमःपरायप्राणत
त्त्वात्मनेनमः इतिकराभ्यांसकलवपुषिव्यापकंन्यसेत् बं नमःपरायबुद्धितत्त्वात्मनेनमः फं नमःपरायअहं
कारतत्त्वात्मनेनमः पं नमःपरायमनस्तत्त्वात्मनेनमः इतित्रयंहृदये नं नमःपरायशब्दतत्त्वात्मनेनमः दं नमः

श्री. क्रा. दी. ८५

परायस्पर्शतत्त्वात्मनेनमः इतिमुखे दंनमः परायरूपतत्त्वात्मनेनमः इतिहृदये थंनमः परायरसतत्त्वात्मनेनमः
लिंगे तंनमः परायगंधतत्त्वात्मनेनमः पदयोः णंनमः परायश्रोत्रतत्त्वात्मनेनमः श्रोत्रयोः ढंनमः परायत्वक्तत्त्वा
त्मनेनमः इतित्वग्विसर्गयोः डंनमः परायदृक्तत्त्वात्मनेनमः चक्षुषोः ठंनमः परायजिह्वातत्त्वात्मनेनमः जिह्वायां
टंनमः परायनासातत्त्वात्मनेनमः नासायां ञंनमः परायवाक्तत्त्वात्मनेनमः वाचिमुखे झंनमः परायपाणितत्त्वात्म
नेनमः पाण्योः जंनमः परायपादतत्त्वात्मनेनमः पादयोः छंनमः परायपायुतत्त्वात्मनेनमः गुदे चंनमः पराय
उपस्थतत्त्वात्मनेनमः उपस्थे ङंनमः परायआकाशतत्त्वायनमः शिरसि घंनमः परायवायुतत्त्वात्मनेनमः
मुखे गंनमः परायतेजस्तत्त्वात्मनेनमः हृदि खंनमः परायजलतत्त्वायनमः लिंगे कंनमः परायपृथिवीत
त्त्वात्मनेनमः चरणयोः शंनमः परायहृत्पुंडरीकतत्त्वात्मनेनमः हृदये हंनमः द्वादशकलात्मव्याप्तसूर्यमंड
लतत्त्वायनमः संनमः परायषोडशकलव्याप्तचंद्रमंडलायतत्त्वात्मनेनमः वंनमः परायदशकलाव्याप्तवह्नि
मंडलतत्त्वात्मनेनमः हृदये त्र्यमपर्युपरिक्रमेणन्यसेत् यंनमः परायपरमेष्ठितत्त्वात्मनेनमः वासुदेवायन
मः शिरसि यंनमः परायपुंस्तत्त्वात्मनेप्रद्युम्नायनमः हृदि रंनमः परायनिवृत्तितत्त्वात्मनेऽनिरुद्धायनमः
लिंगे लंनमः परायसर्वतत्त्वात्मनेनारायणायनमः चरणयोः क्ष्रौंनमः परायकोपतत्त्वात्मनेनरसिंहायनमः
सर्वगात्रे इतितत्त्वन्यासः इतिकृतेथिकृतोभवतिध्रुवंसकलेषुलवमंत्रतपादिषु ततः षोडशवारंकामबीजं
तन्नासादक्षिणनासापुटेवायुंरेचयेत् द्वात्रिंशद्वारंकामबीजंतन्नावामनासापुटेनवारंयुंरेचयेत् ततः षष्ठ्या

राम ८५

रंकामबीजेनतन्नावामनासापुटस्थयेरूपयाकुंभकंकुर्वन् इत्येकः प्राणायामः एवंप्राणायामत्रयंकुर्यात् अथपी
ठन्यासः स्वहृदि आधारशक्तयेनमः प्रकृत्यैनमः कमठायनमः शेषायनमः क्ष्मायैनमः क्षीरसिंधवेनमः
श्वेतद्वीपायनमः रत्नोज्ज्वलमंडितमंडपायनमः कल्पवृक्षायनमः मंदारायनमः दक्षिणांसेनालकायनमः पश्चि
मेपारिजातायनमः उत्तरेकल्पवृक्षायनमः मध्येहरिचंदनायनमः दक्षांसेधर्मायनमः वामांसेज्ञानायनमः
दक्षोरुमूलेवैराग्यायनमः वामोरुमूलेऐश्वर्यायनमः मुखेअधर्मायनमः कुक्षौअज्ञानायनमः दक्षपार्श्वे
अवैराग्यायनमः वामपार्श्वेअनैश्वर्यायनमः पुनर्हृदिशेषायनमः अब्जायनमः अंसूर्यमंडलायद्वादश
कलात्मनेनमः उंसोममंडलायषोडशकलात्मनेनमः मंवह्निमंडलायदशकलात्मनेनमः उपर्युपरिक्र
मेण सेसत्त्वायनमः रंरजसेनमः तंतमसेनमः अंआत्मनेनमः अंअंतरात्मनेनमः पंपरमात्मनेनमः
ह्रींज्ञानात्मनेनमः अंविमलायनमः ईंउत्कर्षिण्यैनमः ऊंज्ञानायनमः एंक्रियायैनमः ऐंयोगायैनमः
ओंप्रह्व्यैनमः औंसत्यायैनमः अंईशानायनमः हृत्पद्मस्याष्टदलेषुततश्च कर्णिकायांअंअनुग्रहायैनमः
तत्कर्णिकोपरि ओंनमोभगवतेविष्णवेसर्वभूतात्मनेवासुदेवायसर्वात्मसंयोगयोगपीठात्मनेनमः
इतिन्यसेत् ततः कृतांजलिःपठेत् अस्यमंत्रस्यनारदऋषिः विराट्छंदः सकलप्रकृतिर्ईशीदेवता क्लींबी
जंस्वाहाशक्तिः पुरुषार्थचतुष्टयेविनियोगः प्रकृतिसकलकरणामिन्यर्थः ततोनारदऋषयेनमः शिरसि
विराट्छंदसेनमः मुखे सकललोकमंगलायश्रीहलायदेवतायैनमः इतिहृदिन्यसेत् अंजलिंबद्ध्वा

र्गांधिष्ठात्रीदेवतायै नमः इति पठेत् ततः षडंगानि अवक्राय स्वाहा हृदयाय नमः इत्यंगुष्ठयोः विवक्राय
स्वाहा शिरसे स्वाहा इति तर्जन्योः सवक्राय स्वाहा शिखायै वौषट् इति मध्यमयोः त्रैलोक्यरक्षणवक्राय स्वा
हा कवचाय हुम् अनामिकयोः असुरांतकवक्राय स्वाहा अस्त्राय फट् इति कनिष्ठकयोः ततश्चावक्रा
य स्वाहा हृदयाय नमः विवक्राय स्वाहा शिरसे स्वाहा शिरसि सवक्राय स्वाहा शिखायै वौषट् शिखायां
त्रैलोक्यरक्षणवक्राय स्वाहा कवचाय हुम् इति सर्वांगेषु असुरांतकवक्राय स्वाहा अस्त्राय फट् इति कर
तलपृष्ठयोः न्यसेत् ऊर्ध्वाधस्तालत्रयं दत्वा छोटिकाभिर्दशदिग्बंधनं कुर्यात् अथ दशांगानि गों नमो
हृदि पीं नमो मूर्ध्नि जं नमः शिखायां नं नमः सर्वगात्रे वं नमः करयोः लं नमो दक्षपार्श्वे भां नमो वामपार्
श्वे यं नमः कंठे स्वां नमः पृष्ठे हां नमो मूर्ध्नि ततः प्रणवपुटितमूलमंत्रं दक्षनयोः अंतर्बाह्यव्यापकं न्य
स्य सर्वोत्कृष्टपरमज्योतिर्मयकुलस्य सकलीकरणार्थं करन्यासः उच्यते अथ सृष्टिः ॐ इति दक्षि
णकरस्यांगुष्ठस्य प्रथमपर्वणि गों द्वितीयपर्वणि ॐ नमः इति तृतीयपर्वणि एवं ॐ पीं ॐ नमः
इति तर्जन्याः सर्वत्रये ॐ जं ॐ नमः इति मध्यमायाः पर्वत्रये ॐ नं ॐ नमः इति अनामिकापर्वत्रये ॐ लं
नमः इति कनिष्ठयाः पर्वत्रये ॐ भां ॐ नमः इत्यामिकायाः पर्वत्रये ॐ यं ॐ नमः इति मध्यमायाः पर्वत्रये
ॐ स्वां ॐ नमः इति तर्जन्याः पर्वत्रये ॐ हां ॐ नमः इत्यंगुष्ठपर्वत्रये इति सृष्टिः अथ स्थितिः ॐ गों ॐ नमः
इति दक्षतर्जन्यां दक्षांगुष्ठे ॐ पीं ॐ नमः दक्षांगुष्ठे दक्षतर्जन्यां ॐ जं ॐ नमः इति तेन मध्यमायां ॐ नं नमः ग्रा° ८६

इत्यनामिकायां नमः पर्वत्रये ॐ लं ॐ नमः इति कनिष्ठायाः पर्वत्रये ॐ भां ॐ नमः इत्यनामिकायाः पर्वत्रये
ॐ यं ॐ नमः इति मध्यमायाः पर्वत्रये ॐ स्वां ॐ नमः इति तर्जन्याः पर्वत्रये ॐ हां ॐ नमः इत्यंगुष्ठस्य पर्वत्रये इति
सृष्टिः अथ स्थितिः ॐ गों नमः इति दक्षतर्जन्यां दक्षांगुष्ठे ॐ पीं ॐ नमः दक्षांगुष्ठे दक्षतर्जन्यां ॐ जं ॐ नमः इ
ति तेन मध्यमायां ॐ नं ॐ नमः इति तेन दक्षानामिकायां ॐ वं ॐ नमः इति तेन कनिष्ठिकायां ॐ लं ॐ न
मः इति वामदक्षतर्जन्या वामांगुष्ठे ॐ भां ॐ नमः इति वामांगुष्ठेन तर्जन्यां ॐ यं ॐ नमः इति तेन मध्यमायां ॐ
स्वां ॐ नमः इति तेनानामिकायां ॐ हां ॐ नमः इति तेन कनिष्ठिकायां इति स्थितिः अथ संहारन्यासः ॐ
गों ॐ नमः इति वामांगुष्ठे वामतर्जन्यां ॐ जं ॐ नमः इति तेन मध्यमायां ॐ नं नमः इति तेनानामिकायां
ॐ वं ॐ नमः इति कनिष्ठायां ॐ लं ॐ नमः इति दक्षांगुष्ठेन दक्षकनिष्ठायां ॐ भां ॐ नमः इति तेनानामि
कायां ॐ यं नमः इति तेन मध्यमायां ॐ स्वां ॐ नमः इति तेन तर्जन्यां ॐ हां ॐ नमः इति तेन दक्षतर्जन्या द
क्षांगुष्ठे इति संहारन्यासः पुनः सृष्टिस्थिती कर्तव्ये ॐ ॐ गों ॐ नमः इति तर्जन्या दक्षांगुष्ठे ॐ पीं ॐ न
मः इति दक्षांगुष्ठे दक्षतर्जन्यां ॐ जं ॐ नमः इति तेन मध्यमायां ॐ नमः नं इति तेन मध्यमायां ॐ नं ॐ न
मः इति तेनानामिकायां ॐ वं ॐ नमः इति तेन कनिष्ठिकायां ॐ लं ॐ नमः इति वामांगुष्ठेन वामकनिष्ठिका
यां ॐ भां ॐ नमः इति तेनानामिकायां ॐ यं ॐ नमः इति तेन मध्यमायां ॐ स्वां ॐ नमः इति तेन तर्जन्या दक्षा
ंगुष्ठे इति सृष्टिः एवं स्थितिरपि कार्या अयं न्यासः पंचधा कार्यः पुनरंगुली पुष्पितक्रमात् दशांगान्या

श्री॰ या क ८७

सः कर्तव्यः ॐ गौं गौं नमो दलकरस्यांगुष्ठया ॐ पीं गौं नमो दलतर्जन्यै ॐ ऌं नमो मध्यमायै नं नमो ना(
मिकायै वं नमः कनिष्ठकायै लं नमो वामांगुष्ठायै भं नमो तर्जन्यै यं नमो तर्जन्यै स्वां नमो नामिकायै द्रां
नमः कनिष्ठायै नमः भावकाय स्वाहा अंगुष्ठाभ्यां नमः विवकाय स्वाहा तर्जनीभ्यां नमः सबकाय मध्यमा
भ्यां नमः त्रैलोक्यरक्षणकाय स्वाहा अनामिकाभ्यां नमः असुरान्तकचक्राय स्वाहा कनिष्ठकाभ्यां नमः इत्ये
गं पंचकमपि अंगुष्ठादिषु न्यसेत् श्रमिनिर्मन्त्रनायमातृकार्णैर्विभिन्नमस्तविंदुभिः पुरवे अन्तसंहारवि
ष्टिमार्गभेदात् दशानज्ञानि वमंत्रवर्णानीति मूलमंत्रमुच्चार्य अंगुष्ठस्वाहायभाज्ञवननवनीतोऽइत्यादिक्रमे
णपंचाशाद्वर्णमातृकास्थानेषु न्यसेत् अथ मंत्रतत्त्वन्यासः गं नमः पराय पृथिवीतत्त्वात्मने नमः पाद
योः पीं नमः पराय सलिलतत्त्वात्मने नमः उपस्थे लं नमः पराय पावकतत्त्वात्मने नमः नं नमः परायनिल
तत्त्वात्मने नमः इति मुखे वं नमः परायाकाशतत्त्वात्मने नमः इति मूर्ध्नि शिरसि लं नमः परायाहंकारतत्त्वात्म
ने नमः ॐ भं नमः पराय महत्तत्त्वात्मने नमः इति हृदये यं नमः पराय प्रकृतितत्त्वात्मने नमः स्वां नमः प
राय पुरुषतत्त्वात्मने नमः द्रां नमः पराय परतत्त्वात्मने नमः इति त्रयं सर्वशरीरे इति संहारः अथ स्थितिः
द्रां नमः पराय परतत्त्वात्मने नमः स्वां नमः पराय पुरुषतत्त्वात्मने नमः यं नमः पराय प्रकृतितत्त्वात्मने नमः
इति त्रयं सर्वशरीरे भं नमः पराय महत्तत्त्वात्मने नमः लं नमः परायाहंकारतत्त्वात्मने नमः इति हृदये
वं नमः परायाकाशतत्त्वात्मने नमः शिरसि नं नमः परायानिलतत्त्वात्मने नमः इति मुखे लं नमः पराय पाव

याम ८७

कतत्त्वात्मने नमः पीं नमः पराय सलिलतत्त्वात्मने नमः उपस्थे गौं नमः पराय पृथिवीतत्त्वात्मने नमः पादयोः
इति सृष्टिः श्रीतत्त्वपूरितं मूलमंत्रं केशामारभ्य पादपर्यन्तं व्यापिनं हस्ताभ्यां व्यापकं वारत्रयं न्यसेत् इति सृष्टिस्थिति
संहारक्रमेण तत्त्वन्यासः तत्र सृष्टिर्यथा गौं नमः इति मध्यमया शिरसि पीं नमः इति मध्यमतर्जनीभ्यां वक्त्र
हृदये लं नमः इति अंगुष्ठवर्जिताभिः कर्णद्वये नं नमः इति अंगुष्ठनामिकाभ्यां नासापुटे लं नमः इति अंगुष्ठतर्ज
नीभ्यां नमो हृदि भं नमः इति अंगुष्ठमध्यमाभ्यां नाभौ यं नमः इति अंगुष्ठवर्जिताभिः स्तनद्वये द्रां नमः इति स
र्वांगुलीभिः पादद्वये इति सृष्टिः अथ स्थितिः लं नमः इति अंगुष्ठतर्जनीभ्यां हृदये भं नमः इति अंगुष्ठमध्य
माभ्यां नाभौ यं नमः इति अंगुष्ठवर्जिताभिर्लिंगे स्वां नमः इति अंगुष्ठवर्जिताभिः स्तनद्वये द्रां नमः इति सर्वांगु
लीभिः पादद्वये स्वां नमः इति मध्यमया शिरसि पीं नमो इति तर्जनीमध्यमाभ्यां वक्त्रद्वये लं नमः अंगुष्ठव
र्जिताभिः कर्णद्वये नं नमः अंगुष्ठनामिकाभ्यां नासापुटद्वये वं नमः सर्वांगुलीभिर्मुखे इति स्थितिः अथ सं
हारः द्रां नमः सर्वांगुलीभिः पादद्वये स्वां नमः अंगुष्ठवर्जिताभिः स्तनद्वये यं नमः अंगुष्ठवर्जिताभ्यां हृद
ये भं नमः अंगुष्ठमध्यमाभ्यां नाभौ लं नमः अंगुष्ठनामिकाभ्यां नासापुटद्वये लं नमः अंगुष्ठवर्जिताभिः क
र्णद्वये पीं नमः तर्जनीमध्यमाभ्यां वक्त्रद्वये गौं नमो मध्यमया शिरसि पुनः सृष्टिस्थिती कर्तव्ये अथ
विभूतिपंजरन्यासः गों आधारे पीं लिंगे लं नाभौ हृदि वा गले ज्ञं मुखे भां दक्षांसे यं वामांसे स्वां दक्षोरौ
द्रां वामोरौ गों कंधरायां पीं नाभौ लं ज्ञं लौं न हृदि वदक्षस्तने ज्ञं वामस्तने भां दक्षपार्श्वे यं वामपार्श्वे स्वां द

दीं श्रां कं ८८

हिनितस्वेहावामनितंबे गोशिरसि पीमुखे ञदक्षनेत्रे वदक्षकर्णे लवामकर्णे भादक्षनसि यवामन
सि स्वादक्षकपोले दावामकपोले गोदक्षभुजे पीऊर्परे ञमणिबंधे नङ्गुलिमूले वङ्गुल्यग्रे लवा
मोरुमूले भाजानुद्वयमूले स्वांगुलिमूले दाङ्गुल्यग्रे मस्तकोपरि गोऽर्ध्वपीऽग्निकोणे ञदक्षिणे
नैऋतिकोणे वपश्चिमे लवायुकोणे भांउत्तरे यईशानकोणे स्वाईशानऊर्ध्वयोर्मध्ये दानैऋतपश्चिमयो
र्मध्ये गोमूर्ध्नि सकले पीदक्षभुजेन दक्षोरौ ञवामोरौ लशिरसि भादक्षचक्षुषि स्वामुखे दाकंठे गोदक्ष
चक्षुषि पीवामचक्षुषि ञहृदये नउदरे ललिंगे भादक्षजानुनि स्वादक्षपादाग्रे दावामपादाग्रे गोदक्षक
र्णे पीवामकर्णे ञदक्षगंडे नवामगंडे वदक्षिणांसे लवामांसे भादक्षस्तने यवामस्तने स्वादक्षपार्श्वे दा
वामपार्श्वे गोदक्षोरुमूले पीस्फिचि पीवामोरुमूले वदक्षोस्फिचि नदक्षोरौ नवामोरौ वदक्षजानुनि लवा
मजानुनि भादक्षजंघायां यवामजंघायां स्वादक्षपादे दावामपादे इति कथितं दिग्विभूतिपंजरं सकलसु
खार्थधर्ममोक्षदम् वरतरुणीमनोनुरंजनं दुरितवारणं तु तमभक्तिवर्धनम् स्मृतियेषास्यमंत्रस्य कीर्तितेस्म
निपंजरम् आर्तिशदुःखितारिभिर्कीर्ति श्रीकांतिपुष्टिदम् अंकेशावाय धान्नेनमः इति भाले अंग्नारायणा
यनमः अर्यम्णेनमः इस्तंदरे मौ ईमाधवाय मित्राय नमो हृदये मंईगोविंदाय वरुणाय नमः गलकूपे गं
विस्नवे अंशुपावेनमो दक्षपार्श्वे वंऊंमधुसूदनाय भगायनमः इति दक्षभुजमूले नेपे त्रिविक्रमाय विवस्व
ते नमः दक्षगले वांपें वामनाय इंद्राय नमो वामपार्श्वे संऔं श्रीधराय पूष्णेनमः इति वामभुजमूले दें औं हृषीके राम ८८

शाय पर्जन्याय नमः इति वामगले वां अं पद्मनाभाय त्वष्ट्रे नमः इति पृष्ठे यं अः दामोदराय विष्णवे नमः ककुदि ॐ
नमो भगवते वासुदेवाय नमो मूर्ध्नि इति मूर्तिपंजरन्यासः आवकारायस्वाहा हृदयाय नमः इत्यादिक्रमेण पुनः
पंचांगुलिन्यसेत् अंगुष्ठात्सवोद्दत्सु श्यावाभवं रुद्राहृदयशीर्षके च अथोंगुष्ठम् लमुष्टिपातालयो करद्वं
गल्येन्त्रम्मणिस्यः नाराचमुद्दोर्ध्वगावाङ्गुष्ठमकांगुष्ठनर्तन्यादितोधनिक्तविष्वग्भिन्नाः कथिनास्त्रमुद्राः
पञ्चाशिणीतर्जनीमध्यमेस्तः ततोक्षराध्यादिन्यासं कुर्यात् नारदऋषयेनमः इत्यादि ततः करकच्छपिकां बद्धा उ
पांत्नीताश्रीरुसंध्यायेत ॥ सज्यामरत्नदलितोत्तनमेघपुञ्जप्रत्यग्रनीलजलजन्मसमानभासम् सुस्नि
ग्धनीलघनकुंचितकेशजालराजन्मनोज्ञशितिकंठशिखंडचूडाम गोरभ्रलाञ्छितसुरद्रुमसूनकल्पि
तोच्चंसमकनवपल्लवकर्णपूरम् लोलालकस्फुरितभालतलप्रदीप्त गोरोचनातिलकमुज्ज्वलचिल्लि
मानम् आघूर्णपारदगताग्रपाथ्रांकबिंबकांताननं कमलपत्रविशालनेत्रम् रत्नस्फुरन्मकरकुंडल
रश्मिदीप्तगंडस्थलीमकुरमुन्नतचारुनासं सिंदूरसुंदरतराधरमिंदुकुंददमंदारमंदहसितद्युतिदीपिता
स्यम् वन्यप्रवालकुसुमप्रचयावक्लृप्तग्रैवेयकोज्ज्वलमनोहरकंबुकंठं मत्तभ्रमद्भ्रमरजुष्टवनस्पमा
लासंतानकप्रसरदामपरिष्कृतांसं हारावलीभगणराजितपीवरोरुव्योमस्थलीलसितकौस्तुभभानुमंत
म् श्रीवत्सलक्षणसुलक्षितमुन्नतांसमाजानुपीनपरिवृत्तसुजातबाहुम् आबंधुरोदरमुदारगभीरनाभिं
भृंगांगनानिकरमंजुलरोमराजिम् नानामणिप्रघटितांगदकंकणोर्मिग्रैवेयसारसननूपुरतुंदबंधम्

श्री॰
क्र॰
दी॰
८४

दिव्योद्यानमापरिपिंजरितांगयष्टिमापीतवस्त्रपरिवीतनितंबबिंबम् वार्तक्रसत्प्रमन्नरत्नमनोज्ञसंधेकांतोत्रतध
यदर्निदिनकूर्मकांतिमापिकादर्पणत्वलसमग्रत्वराजिराजद्वलांगुलिस्फुरदनसंदरपादपद्मम् मत्स्यांकुशादि
दरकेतुयवाब्जवज्रसंलक्षितारुणकरांघ्रितलाभिरामम् लावण्यसारसमुदायविनिर्मितांगसौंदर्यनिर्जितमनो
भवदेहकांतिम् आस्यारविंदपरिपूरितवेणुरंध्रलोलत्कराग्रुलिसमीरितदिव्यरागो घावनद्रवीकृतविकृष्ट
समस्तजंतुसंतानसंततिमनंतसुखांबुराशिम् मूलाधारे कुंडलिनी सोमरूपा हृदयकमलमध्ये जीवो वह्निरू
पः शिरसि परमात्मा सूर्यरूपः तैस्त्रिभिस्तेजोभिः कृष्णरूपोऽनान्तः इति ध्यायेत् ॥ फुल्लेंदीवरकांतिमिंदुवद
नं बर्हावतंसप्रियं श्रीवत्सांगमुदारकौस्तुभधरं पीतांबरं सुंदरम् गोपीनां नयनोत्पलार्चिततनुं गोगोपसं
घावृतं गोविंदं कलवेणुवादनपरं दिव्यांगभूषं भजेत् इति वा ध्यायेत् ततः कृष्णोऽहमिति ध्यात्वा मानसैरर्घ्या
दिभिः संपूजयेत् जलेन मंडलं निर्माय तदुपरि त्रिकादिभिः कारोप्यास्त्रगोलकाय चक्राय स्वाहा अस्त्राय
फडिति पात्रं प्रक्षाल्य त्रिपादिकायां स्थापयेत् तत्र पात्रे आचक्राय स्वाहा हृदयाय नमः इति गंधादिना पू
ज्याग्निं स्थापयेत् ततो विलोममातृकां पठन् शुद्धजलेन पात्रं पूरयेत् मं वह्निमंडलाय दशकलात्मने नमः इति
त्रिपादिकां अं सूर्यमंडलाय द्वादशकलात्मने नमः इति पात्रं उं सोममंडलाय षोडशकलात्मने नमः इति जलं पू
रयेत् ततो गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिंधु कावेरि जलेऽस्मिन् सन्निधिं कुरु इति सवितृमंडला
त्तन्निस्मिन् जले अंकुशमुद्रया तीर्थमावाहयेत् तस्मिन् जले स्वहृदयस्थं श्रीकृष्णमप्यावाहयेत् ततः पा

राम
८४

त्रजले वामे गंगां मध्ये सरस्वतीं दक्षिणे यमुनां भावयेत् तस्य जलोपरि सुचक्राय शिखायै वौषट् इति गालिनीमु
द्रां दर्शयेत् वौषडिति तज्जलं वीक्षयेत् त्रिकोणरक्षणचक्राय स्वाहा कवचाय हुम् इति तर्जनीभ्यामवगुंठये
त् तज्जले श्रीकृष्णस्वरूपं भावयेत् ततः आचक्राय स्वाहा हृदयाय नमः विचक्राय स्वाहा शिरसे स्वाहा सुचक्रा
य स्वाहा शिखायै वौषट् त्रैलोक्यरक्षणचक्राय स्वाहा कवचाय हुम् तस्मिन् जले विन्यस्य असुरांतकचक्राय स्वाहा
अस्त्राय फट् इति तालत्रयं दत्वा छोटिकाभिर्दशदिग्बंधनं कुर्यात् तज्जले स्पृष्ट्वा मूलमंत्रमष्टधा जपेत् ततो
धेनुमुद्रयामृतीकृत्य कुर्यात् किंचिज्जलं पात्रांतरे कृत्वा मूलमंत्रमुच्चार्य त्रिवारमात्मानं पूजोपकरणं चाभ्युक्षेत्
ततो मूर्ध्नि प्रहंस मूलाधारे गणपतिं संपूजयेत् ततो मूलाधारे कुंडलिनी तेजोरूपा हृदये जीवो वह्निरूपः भ्रूमध्ये
परमात्मा तेजोरूपः तत्रैतत्त्रयं कामबीजं सुषुम्ना मूलाधारादि ब्रह्मरंध्रांतमेकीभूतमानेदं ध्यात्वा तद्दिव्यज्ञानं चिंतयेत्
तत्रैव स्वहृदयकमले आचक्राय स्वाहा हृदयाय नमः विचक्राय शिरसे स्वाहा शिरसे स्वाहा सुचक्राय स्वा
हा शिखायै वौषट् त्रैलोक्यरक्षणचक्राय स्वाहा कवचाय हुम् ज्वालाचक्राय स्वाहा नेत्राभ्यां वौषट् असुरांतक
चक्राय स्वाहा अस्त्राय फट् इति षडंगमंत्रैः सर्वांगं संपन्नं श्रीकृष्णविग्रहमाविर्भूतं विचिंत्यात्मशरीरं श्रीकृष्णवि
ग्रहयोरैक्यं विचिंत्य तस्मिन् श्रीकृष्णविग्रहाभिन्ने स्वशरीरे विभूतिपंजरादिषडंगन्यासपर्यंतं पीठन्यासक्रमेण र
त्नपीठा आसनस्वागतार्घ्यपाद्याचमनीयमधुपर्कपुनराचमनीयस्नानीयवस्त्रालंकारगंधपुष्पधूपदीपोपचारैः श्रीकृ
ष्णविग्रहाभिन्नं स्वशरीरं पूजयेत् पुनरपि विभूतिपंजरन्यासस्थानमारभ्य षडंगन्यासस्थानपर्यंतं विभूतिपंज

श्री॰ ग्रां॰ कं॰ ग्य॰

रन्यासमेवषडंगन्यासंमंत्रैः स्पार्शैरिहलनयेत् पुनरपिस्तवदनेवेणांहृदयेवनमालांस्तनस्याधेश्रीवत्संकौस्तुभं
वप्रलनयेत् अंगपाकस्त्रेहिभलिपिंतरन्यासंविभलिपंतन्यासमंत्रेणरलांकुर्यात् किंतपीठन्यासादिक्रमेण
सनायलेकारांतेनरलनयेत् अंगाध्यपाकः वेत परंतलिमिःरलनयेत् ततोमूलमंत्रपठितांचंदनपंकेनसर्वांग
लेपयेत् ततोनामिकयादीपशिखाकारांद्वादशदीर्घतिलकांद्वादशसुस्थानेषुकुर्यात् ॐकेशवायधात्रे
नमइतिललाटे नंॐनारायणायार्यम्णेनमउदरे मोंॐमाधवायमित्रायनमोहृदये भंॐगोविंदायवरु
णायनमोगलकूपतले गंॐविष्णवेअंशवेनमः दक्षपार्श्वे वंॐमधुसूदनायभगायनमः दक्षभुजमूले तंॐ
त्रिविक्रमायविवस्वतेनमः दक्षगले वांॐवामनायइंद्रायनमः वामपार्श्वे स्वंॐश्रीधरायपूष्णेनमः इतिवा
मगले वांॐपद्मनाभायत्वष्ट्रेनमः इतिपृष्ठे यंॐदामोदरायविष्णवेनमः ककुदि ॐनमोभगवतेवासुदेवा
यनमइतिमूर्ध्नि ततःशुक्लतुलसीदलैः शुक्लचंदनमिश्रैरंजलिमादायमूलमंत्रमुच्चार्यश्रीकृष्णायपत्रतुल
